CC-0. Nepal Sanskrit Academy, Kathmandu

# पूर्णिमा

इतिहास-प्रधान त्रैमासिक पत्रिका

९१

पू

र्णा

ङ्क

संशोधन-मण्डल

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

का. मे. अ. द. नं. १५५/२४९

तदिह न गुणदोषौ योजनीयावलीकौ
कथमपि महता यत् संस्कृतोऽयं श्रमेण ।

—बापूदेव शास्त्री

[ धेरै मिहिनेत गरी यो तयार गरिएको छ । यस कारण यहाँ झूटो गुण अथवा दोष नलाइदिनुहोला । ]

# पूर्णिमा

( इतिहास–प्रधान त्रैमासिक पत्रिका )

२३ वर्ष

३ अङ्क

सम्पादक–
महेशराज पन्त
दिनेशराज पन्त

प्रकाशक–
देवीप्रसाद भण्डारी
(संशोधन–मण्डलद्वारा)

यस अङ्कको मूल्य रु. ५५।–

CC-0. Nepal Sanskrit Academy, Kathmandu

# विषयसूची


१. स्रग्धरास्तोत्र तथा चण्डी —नयराज पन्त
सहायक— देवीप्रसाद भण्डारी
रुक्मनाथ पौडेल १–४

२. नेवारराज्य गइसकेपछि पनि नेवारी ढङ्गमै ताडपत्रमा
लेखिएका लिखतमा ब्राह्मण —महेशराज पन्त ५–७

३. वमबहादुरले कलकत्तामा सैनिक तालीम लिइरहेका लेफ्टेन
हरिभक्त खत्रीलाई लेखेको अप्रकाशित पत्र —दिनेशराज पन्त ७–८

४. बेलायततिर लागेका जङ्गबहादुरलाई भाइ बद्रीनरसिंहले
लेखेको अप्रकाशित पत्र —दिनेशराज पन्त ८

५. दैवज्ञशिरोमणिलक्ष्मीपतिना (वि. सं. १८१५–१८८८)
विरचितस्य रत्नदीपस्य मूलभागस् प्रतिसंस्कर्ता— नयराजपन्तः
तस्य प्रतिसंस्कृतरूपं च सहायकाः— रामजीतेवारी
देवीप्रसादभण्डारी
रुक्मनाथपौडेलः ९–५४

ग्रहध्रुवाधिकारः: १०–१६
पञ्चाङ्गाधिकारः १७–३५
भौमादितारग्रहाणां स्पष्टाधिकारः ३६–५४

CC-0. Nepal Sanskrit Academy, Kathmandu

# स्रग्धरास्तोत्र तथा चण्डी*

– नयराज पन्त
सहायक– देवीप्रसाद भण्डारी
रुक्मनाथ पौडेल

स्रग्धरास्तोत्र नाम गरेको एउटा स्तुतिकाव्य प्रसिद्ध छ । महायानी बौद्धहरू स्रग्धरास्तोत्र अत्यन्त श्रद्धापूर्वक पाठ गर्ने गर्छन् । यो स्तुतिकाव्य हस्तलिखित तथा मुद्रित दुवै रूपमा उपलब्ध छ । एशियाटिक सोसाइटी अफ बङ्गाल (एशियासम्बन्धी अध्ययन गर्ने बङ्गालको संस्था)बाट वि. सं. १९६४/६५ (ई. सं. १९०८)मा प्रकाशित, सतीशचन्द्र विद्याभूषणद्वारा सम्पादित स्रग्धरास्तोत्र हामीसँग छ । यस स्तुतिकाव्यमा स्रग्धरा छन्दका जम्मा ३७ श्लोक छन् । यसको अन्त्यमा तलका वाक्य लेखिएका छन्–

इत्यार्य्यतारायाः स्रग्धरास्तोत्रं परिसमाप्तम् ।। शुभम् ।।
कृतिरियं सर्व्वज्ञमित्रपादानां काश्मीरकाणां ताराचरणरेणुधूसराणाम् ।

[ आर्यताराको स्रग्धरास्तोत्र समाप्त भयो । कल्याण होस् ।]
यो रचना ताराका पाउको धूलोले फुस्रो भएका, आदरणीय, काश्मीरका सर्वज्ञमित्रको हो । ]

यताबाट स्रग्धरास्तोत्रका रचयिता सर्वज्ञमित्र हुन् र यिनी काश्मीरका हुन् भन्ने सामान्य परिचय पाइन्छ ।

वर्धन्ते यावदन्ते परुषपरिभवाः प्राणिनां दुःखवेगाः
सम्यक्सम्बुद्धयाने प्रणिधिधृतधियां तावदेवानुकम्पा ।।६।।

स्रग्धरास्तोत्रका यो पङ्क्तिको जिनरक्षितले गरेको व्याख्या यस्तो छ–

प्राणिनामेते पुरोवर्त्तिनो दुःखवेगानां प्रवाहाः । किम्भूताः ? परुषपरिभवाः परुषोऽतिनिष्ठुरः परिभवस्तिरस्कारो येषु ते तथा । वर्द्धन्ते वृद्धिमुपयान्ति यावत् तावदेतत्पर्य्यन्तमेव अनुकम्पा महाकरुणा । केषां सम्यक्सम्बुद्धयाने सुगतमहावर्त्मनि प्रणिधिर्बोधिचित्तम् उत्पाद्य निखिलत्रिजगदुद्धरणाय उद्योगः प्रस्थानचित्तं तत्र धृता निहिता बुद्धिः प्रज्ञा यैस्तेषाम् ।

जिनरक्षितको माथिको व्याख्याको सारांश यस्तो हुन्छ–

बौद्ध धर्मको महायानमा लागेकाहरू आफ्नो चित्तमा बोधिज्ञान पैदा गराउँछन् तथा संसारभरका प्राणीहरूले दुःख पाइरहेसम्म तिनको दुःख हटाउने कोशिश गरिरहन्छन् ।

यताबाट यस स्तुतिकाव्यका रचयिता महायानी बौद्ध थिए भन्ने स्पष्ट हुन्छ ।

---

* वि. सं. २०४३ चैत्र ६ गते शुक्रवार नेपाल राजकीय प्रज्ञा–प्रतिष्ठानमा गरिएको प्रवचन ।

CC-0. Nepal Sanskrit Academy, Kathmandu



रोगव्याधि तथा चोरडांकाहरूको डर प्रत्येक मानिसलाई भइरहन्छ। बाटामा हिँड्ने बटुवाहरूलाई बाघ, भालू, हात्ती, सर्प आदि हिंस्रक जनावरहरूको पनि डर भइरहन्छ। समुद्री यात्रामा निस्किएकाहरूलाई नाउ बिग्रिएर डुबिएला कि भन्ने डर पनि हुन्छ। आगलागीको डर पनि सबैलाई हुन्छ। त्यस्तै राजाको डर पनि हुन्छ।

भगवती आर्यताराको शरणमा पर्नेलाई कुनै किसिमको आपत्ति आइपर्दैन, उसले उपर्युक्त सबै किसिमका डर-त्रासबाट मुक्ति पाउँछ, ताराको भजन गर्नु नै सबै किसिमको दुःखबाट पार पाइने उपाय हो भनी स्रग्धरास्तोत्रमा लेखिएको छ।

यो भयो बुद्धमार्गीहरूको कुरा।

हाम्रो देशमा शिवमार्गीहरू चण्डी (सप्तशती) प्रति विशेष श्रद्धा गर्दछन्। प्रत्येक वर्ष दशैं मनाउँदा घरैजसोको घरमा चण्डीपाठ हुने गर्छ।

शरत्काले महापूजा क्रियते या च वार्षिकी ।
तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्तिसमन्वितः ॥१२॥
सर्वबाधाविनिर्मुक्तो धनधान्यसुतान्वितः ।
मनुष्यो मत्प्रसादेन भविष्यति न संशयः ॥१३॥

(चण्डी, १२ अध्याय)

[ प्रतिवर्ष शरत्कालमा मेरो (देवीको) पूजा हुने गर्छ। त्यस अवसरमा मेरो (देवीको) यो माहात्म्य (चण्डी) जसले श्रद्धापूर्वक सुन्दछ, उसले सबै किसिमका दुःखबाधाहरूबाट छुटकारा पाई मेरा (देवीका) अनुग्रहले धन, धान्य तथा पुत्र इत्यादि पाउनेछ। यसमा कुनै तरहको सन्देह मान्नुपर्दैन। ]

दुर्गा भगवतीको आराधना गर्नेले कुनै प्रकारको दुःखकष्ट भोग्नुपर्दैन, उसले उपर्युक्त सबै किसिमका डर, त्रासबाट मुक्ति पाउँछ, देवीको भजन गर्नु नै सबै प्रकारका दुःखबाट छुटकारा पाइने उपाय हो भनी चण्डीमा लेखिएको छ।

यो भयो शिवमार्गीहरूको कुरा।

अब यस विषयलाई स्रग्धरास्तोत्र तथा चण्डीका केही श्लोकहरूको उद्धरण गरी अझ स्पष्ट पारिन्छ।

कल्पान्तोद्भ्रान्तवातभ्रमितजलचलल्लोलकल्लोलहेला-
संक्षोभोत्क्षिप्तवेलातटविकटचटत्स्फोटमोट्टाट्टहासात् ।
मज्जद्भिर्भिन्ननौकैः सकरुणरुदिताक्रन्दनिस्पन्दमन्दैः
स्वच्छन्दं देवि सद्यस्त्वदभिनुतिपरैस्तीरमुत्तीर्यतेऽब्धेः ॥१०॥

(स्रग्धरास्तोत्र)

[ ज्यादै ठूलो हुरी आएर समुद्रको पानी छपालछपाल पारिंदा त्यहाँ उठेका ठूलाठूला छाल आपसमा टक्कर खाँदै समुद्रको किनारसम्म आइपुग्दा आएको भयङ्कर शब्दले तर्सिएका, नाउ बिग्रेर डुब्न लाग्दा हाहाकार भई रुँदै कराउँदै लत्याकलुत्रुक परिसकेका मानिसहरू पनि, हे आर्यतारा! हजुरको स्तोत्रपाठ गरे भने छिटै नै समुद्र तरी सकुशल किनारमा आइपुग्छन्। ]

CC-0. Nepal Sanskrit Academy, Kathmandu



आघूर्णितो वा वातेन स्थितः पोते महार्णवे ।।२७।।
स्मरन् ममैतच्चरितं नरो मुच्यते सङ्कटात् ।।२९।।

(चण्डी, १२ अध्याय)

[ महासागरमा ठूलो हुरी आई नाउ हल्लाउँदा सङ्कटमा परेको मानिसले मेरो (देवीको) यो चरित्र (चण्डी) सम्झियो भने उसले त्यस सङ्कटबाट पार पाउँछ । ]

धूमभ्रान्ताभ्रगर्भोद्भवगगनगृहोत्सङ्गलिङ्गत्स्फुलिङ्ग-
स्फूर्जज्ज्वालाकरालज्वलनजवविशद्वेश्मविश्रान्तशय्याः ।
त्वय्याबद्धप्रणामाञ्जलिपुटमुकुटा गद्गदोद्गीतयाच्ञाः
प्रोद्यद्विद्युद्विलासोज्ज्वलजलदजवैरान्नियन्ते क्षणेन ।।११।।

(स्रग्धरास्तोत्र)

[ घरमा आगलागी भइरहेछ, धूवाँको मुस्लो मडारिँदै बादल बनिरहेछ, घरको बुइँगलसम्म आगाको ज्वाला पुगिरहेछ, त्यस्तो घरमा बिछ्यौनामा बसिरहेका मानिसले पनि, हजुरलाई हात जोड्दै सुँक्कसुँक्क गर्दै बिन्ती गरे भने, हे तारा ! उत्तिखेर नै बिजुलीसमेतको बादल उठ्छ र मुसलधारे वर्षा भई तिनीहरूको रक्षा हुन्छ । ]

... दावाग्निपरिवारितः ।।२५।।
स्मरन् ममैतच्चरितं नरो मुच्यते सङ्कटात् ।।२९।।

(चण्डी, १२ अध्याय)

[ डढेलो (वनमा भएको आगलागी)ले घेरिएको मानिसले मेरो (देवीको) यो चरित्र (चण्डी) सम्झियो भने उसले त्यस सङ्कटबाट पार पाउँछ । ]

दानाम्भःपूर्यमाणोभयकटकटकालम्बिलोलम्बमाला-
हूङ्काराहूयमानप्रतिगजजनितद्वेषवह्नेर्द्विपस्य ।
दन्तान्तोत्तुङ्गदोलातलतुलितवपुस्त्वामनुस्मृत्य मृत्युं
प्रत्याचष्टे प्रहृष्टः पृथुशिखरशिरःकोटिकोट्टोपविष्टः ।।१२।।

(स्रग्धरास्तोत्र)

[ मदको धाराले निश्रुक भएका आपना दुवै गण्डस्थलमा झुम्मिएका भमराको आवाजले गर्दा आफूतिर लम्किएको प्रतिद्वन्दी हात्तीहरूलाई देखेर झनै रीसले आगो भएको हात्तीले रीसको झोँकमा फुर्न मानिस-लाई दुवै बाह्रालै उठाई कालको नगीच पुऱ्याइदिन लागेको छ भने पनि, हे तारा ! त्यस मानिसले हजुरको स्तुति गऱ्यो भने मिलिकनुसट्टा त्यसै हात्तीमाथि आनन्दपूर्वक बस्न पाउनेछ । ]

CC-0. Nepal Sanskrit Academy, Kathmandu



वज्रक्रूरप्रहारप्रखरनखमुखोत्खातमत्तोभकुम्भ-
श्चोतत्सान्द्रास्रधौतस्फुटविकटसटासङ्कटस्कन्धसन्धिः ।
क्रुध्यन्नापित्सुरारादुपरिमृगरिपुस्तीक्ष्णदंष्ट्रोत्कटास्य-
स्त्रस्यन्नावृत्य याति त्वद्रुचितरचितस्तोत्रदिग्धार्थवाचः ।।१४।।

(त्रग्धरास्तोत्र)

[ वज्र जस्ता कडा चपेटाले र तीखा नङ्ग्राले हात्तीको गण्डस्थल फोरी त्यहाँबाट बगिरहेको रगतले मुख, जगर र काँधसम्म रक्ताम्मे पारी जथाभावी उफ्रँदै आउन लागेको झोक्किएको सिंह पनि; हे तारा ! हजुरको स्तोत्र पाठ गर्न लागेको मानिसदेखि तसिएर फर्किहाल्छ । ]

सिंहव्याघ्रानुयातो वा वने वा वनहस्तिभिः ।।२६।।
स्मरन् ममैतच्चरितं नरो मुच्येत सङ्कटात् ।।२९।।

(चण्डी, १२ अध्याय)

[ वनमा सिंह, बाघ, हात्तीहरूले लखेटिएको मानिसले पनि मेरो (देवीको) यो चरित्र सम्झियो भने उसले त्यस सङ्कटबाट पार पाउँछ । ]

यहाँ त्रग्धरास्तोत्र तथा चण्डीका केही पद्य उद्धृत गरी तिनको तुलना गरियो । भगवती आर्यताराको समुचित सेवा गरेको खण्डमा आफूले चिताएको जेसुकै वस्तु पनि पाइन्छ, जस्तोसुकै आपत्ति आइपरे पनि टरेर जान्छ भन्ने कुरा तथा विश्वभरमा सर्वशक्तिशालिनी भगवती आर्यतारा नै हुनुहुन्छ भन्ने कुरा त्रग्धरास्तोत्रले प्रकट गर्छ । त्यसै गरी भगवती दुर्गाको समुचित सेवा गर्न सक्यो भने आफूले चिताएको जेसुकै वस्तु पनि पाइन्छ; जस्तोसुकै आपत्ति आइपरे पनि टरेर जान्छ भन्ने कुरा तथा विश्वभरमा सर्वशक्तिशालिनी भगवती दुर्गा नै हुनुहुन्छ भन्ने कुरा चण्डीले प्रकट गर्छ ।

बौद्ध दर्शन र शैव दर्शनमा केही भेद भए तापनि ती मतका उपासकहरू भगवतीको आराधना गर्दा एकै प्रकारको भाव राख्तछन्, नामचाहिँ अलग अलग भए तापनि उपासनाको क्रममा ती दुवै मतका उपासकहरूमा समानता देखिन्छ भन्ने कुरा स्पष्ट छ ।

□

CC-0. Nepal Sanskrit Academy, Kathmandu

# नेवारराज्य गइसकेपछि पनि नेवारी ढङ्गमै ताडपत्रमा लेखिएका लिखतमा ब्राह्मण

– महेशराज पन्त

१ सङ्ख्या

ने. सं. ८९४ [वि. सं. १८३०] मार्गशुक्लपूर्णिमा

यो पत्र वि. सं. २०४१ मा काठमाडौँबाट श्री ५ को सरकार शिक्षा तथा संस्कृतिमन्त्रालय, पुरातत्त्वविभाग, राष्ट्रिय अभिलेखालयद्वारा प्रकाशित; शङ्करमान राजवंशीको भूमिसम्बन्धी तमसूक–ताडपत्र २ भागका ४८–४९ पृष्ठमा छापिएको छ ।

२ सङ्ख्या

ने. सं. ९०१ [वि. सं. १८३७] चैत्रशुक्लद्वितीया

नेपाल–जर्मनहस्तलिखितग्रन्थसंरक्षणपरियोजनाको माइक्रोफिल्मको रीलसङ्ख्या ई २१२८/४१

यस पत्रमा बायाँपट्टि फट्केमा माटाको, वरिपरि थोप्लैथोप्ला भएको गोलो छाप छ । छापको बीचमा खड्ग छ । खड्गको वरिपरि बुट्टाहरू छन् ।

मूलपाठ

१. १ शुभ ।। सम्बत् ९०१ चैत्रशुद्धि २ श्रीसक्वोमौमो श्री ३ सोयम्बुवैत्रस्थाने ,, ग्राहाक ध्वक्कलंटोल सोषाछेगृह-वास्तव्य ‚ शुधर भारो ,, कृष्णधरमातृपुत्रसह नाम्नेन सकासात् तत्रैव स्थाने घाण्णंक देवपूल ग्वथचौरछे-गृहाधिवासिन ,, विप्र श्रीचाम्या दोत्याल भातृ श्रीदेओनारायन ,, श्रीकृष्ण दोत्याल भातृपुत्रकस्य नाम्नेन सुक्रीयं सुमुज्यमानिकं स्थानस्य आग्नेदिसे प्रवेस्य ,, घालापातन पश्चिम

२. म मार्ग्गन पूर्व्व घालापातन दक्षिन रामदेओ भारोया गृहेन उत्तर ।। एतेखां वाग्वलतुथिगृहेनामसंज्ञकं तस्य गृहे जाओछे खा ७ चुला ३ मुल मोहो ६०२ पूर्व्वसोसिमायां पलिभोगं जथादेशकारप्रवर्त्तमान तथा संचात्रा-घातेन ,, ।। सुव्वर्ण्णपूष्पमालार्घं प्रढौकृतं क्रयविक्रयस्वादिनेन क्रीयविक्रीयंस्तं भवति ।। यद्यस्याकलाजिक व्याघातपर यन पि-

३. वा स्यात्तं घाण्णंक परिसोघरि सोघनियंश्चं ।। अत्र पत्रर्थं साछि नायक प्रमान ग्वविन्वघर भाजुदेओ[1] ,,

---

१. पहिले लेखिएको अक्षरमाथि ओ लेखिएको छ ।

CC-0. Nepal Sanskrit Academy, Kathmandu



बीरकृष्णसि ,, लक्ष्मीसि ग्वविन्द पंचप्रभृति ।। लिखितं[२] दैवज्ञ भाजुनरसिंह ।। शुभ ।। ० ।। ० ।। ० ।। शुभ ।।[३]

(पछाडिपट्टि)

छेंया पत्र

३ सङ्ख्या

ने. सं. ९०७ [वि. सं. १८४३] मार्गकृष्णएकादशी

नेपाल-जर्मनहस्तलिखितग्रन्थसंरक्षणपरियोजनाको माइक्रोफिल्मको रीलसङ्ख्या ई १९०३/३४

मूलपाठ

१. १ ॐ अद्य श्रीब्रह्मणो द्वितीयपरार्द्धे, श्वेतवराहकल्पे, वैवस्वतमन्वंतरे, अष्टाविंशतिमे, बौधअवतारे, कलौ युगे, प्रथमपादे, भरतखण्डे, भारतवर्षे, जाम्बूद्वीपे, गंगादेव्याह उत्रकोणे, हिमवद्दक्षिणपार्श्वे, गोपुच्छपर्व्वते, नेपालमण्डले, श्री ३ पशुपतिसंनिधाने, वाशुकिक्षेत्रे, वाग्मत्यायाः पूर्व्वकूले, कौशिकायाः पश्चिमकूले, आर्य्यावतदेशे, इह पुंण्यभूमौ ।। श्रीमध्यपूरिस्थाने, श्री ३ बालकुमार्य्याश्चरण, पल्लवसंन्निधाने, श्रीमद्विष्णुप्रजापतिक्षेत्रे, श्रीसूर्य्य,

२. दक्षिणायणे, जलनामसम्बत्सरे, हेमंन्तऋतौ, सत्वोगुणे ।। अद्य मार्गशिरमासे कृष्णपक्षे, एकादश्यां तिथौ, विशाखानक्षेत्रे, धृतियोगे, अंगवार्सरे, यथा लग्नमूहूर्त्त[१]करणान्वितायां, धनुराशिगते सवितरि, तुलाराशिगते चन्द्रमशि, यथाराशिगते देवगुरौ, अनेषु ग्रहेषु सत्सु ।। ।। आसमंतो ।। जजोमान, श्रीमध्यपूरिदेशया, इनायलाछितोलया, ब्राह्मुननिया, कास्येपग्वत्र, जयमानसिंह मारोन, थग्रो स्वरूप जुस्ये, थग्रोता निमिस्तीन, श्री ३ पशुपतिनाथ, प्रीतिन गुठि संप्रदत्त ।। तदश्चा-

३. त्र ।। ईदोल बु रोग्रो खु ६ थ्वते बुया ओलसानन बदे हाने जुलो ।। दाछियात पूजाजोलनया, जमाबंदिया लेखा ।। वैशाखशुक्लया, पूर्णिमास ।। श्राओनशुक्लया, पूर्णिमास ।। कार्तिकशुक्लया, पूर्णिमास ।। थ्व स्वप्वातस पूजा वानेमाल जुलो ।। ।। श्री ३ किर्त्तिमुखसके, पूजाजुल ३[५] न्यान सह्मय, किग्वल हामल तेछो, स्वान सिधर, धुं धुपाच, हासखेज ग्वलं ३ हास ह्मं ३ दक्षिणा दं ३ नैवेद्ये बजि सलि ग्वल ३ स्वगं धलिपात ६ माल जुलो ।। ।। श्री ३ पशुपतिनाथजुस्के, पूजाजुल ३ हामल तेछो, किग्वल स्वान,

४. जजोमका पूं १८ घेल तोला १५ कस्ति तोला १५ चिनि साखल तोला १५ ग्वच ग्वल ३० जोता गुछि ३ हामल तोला १५ तेछो तोला १५ आक्षेत तोला १५ मता प्वात १५ धुं. पू १८ सिधल तोला १।। धुपाच तोला ३

---

२. तं अक्षर मसीले लतपतिएको छ ।

३. मूल ताडपत्रमा तेस्रो पङ्क्तिको झण्डै झण्डै आधा भागमा पाठ पूरा भएपछि त्यो पङ्क्ति भर्नको लागि दोहरो दण्ड र यस्ता ु चिह्नको बीचमा प्रशस्त ठाउं छोडी अर्को दोहरो दण्ड हालिएको छ ।

४. पहिले लेखिएका अक्षरमाथि र्त्त लेखिएको छ ।

५. ३ अङ्क मसीले लतपतिएको छ ।

CC-0. Nepal Sanskrit Academy, Kathmandu



सिल्हाये तोला ३ नैवेद्य बजि कुल ३।।।. ग्वल[६] धौल ग्वलं ३ दुदु कुल ३।।।. देओदक्षिणा दं १५ हादक्षिणा दं १२ पुजाहारि भटजुयात निसलाव बजि ् कुल ६ धलिपात ९ चाकुमाधि ता १२ माल जुलो ।। ।। भोजन यायतान जोलन ।। थोकि जाकि फं ६

५. बजि फं ९ समुनि फं ३ म्वात कूल १ ।।. क्वटधौ कुल ३ ला. कुल ९ धौ ग्वल ३ दुदु कुल ६ फोयागु कयेगु कुल ३ ह्याउंथ्व कुल ६ ऐलाथ्व कुल ३ जुगिवो छबो १ बियमाल ।। छेबो २ तयेमाल ् चिवोस बजि कुल १ ला क्वट १२ ओल पा १ प्याघासा दक्वं तयमाल जुलो ।। ।। जाकिछिज्या यायतान जोलन ् द्योकि जाकि[७] फं १ बजि फं २ ला कुलत्या १।।. थकीस छबो[८] २ तयमाल जुलो ।। ।। गुठिभारोपनि नाम ।। सिधिनंदसि ् सिधिजय ् जयलक्ष्मीमयियाता थ्व बुया लगा-

६. समेतं बिया जुलो ् सिरिकिष्ण भारो ।। ।। थ्वते पत्रस चोसे तक्व मयातसां ् पंचमाहापातक लाक जुलो ् थ्वते पत्रस चोसे तक्व यातसा ् स्वर्गप्राप्ति ् वैकुण्ठवास लाइओ जुलो ।। ।। स्वदत्तपरदत्तम्वा यो हरन्ति वसुन्धरा ् षष्टीवर्षसहस्रानि ् विस्तायाः जायतेऽ क्रीमो ।। ।। थ्वतेया दृष्टसाक्षि ् पंचभूतानि ।। लिखित कायस्थ ् धनसंखर ।। सम्वत् ९०७ मार्गशिरवदि ११ अंगवार खुनु चोया जुलो ।। शुभं ।।[९]

(पछाडिपट्टि)

१. श्री ३ पशुपतिनाथयां ्

२. (गु)ठया दानपत्र जुलो ्

□

# बमबहादुरले कलकत्तामा सैनिक तालीम लिइरहेका लेफ्टेन हरिभक्त खत्रीलाई लेखेको अप्रकाशित पत्र

– दिनेशराज पन्त

१. सं १९०५ साल फागुनवदि २ रोज ६[१] श्रीमिनिष्टर राणाजीबाट लिफटेन हरि-

२. भक्त षत्रीके

---

६. पहिले लेखिएका अक्षर मेटी मेटिएका अक्षरमाथि .ग्वल लेखिएको छ ।

७. मूल ताडपत्र भाँचिएर गएकोले जाकिको जाको काप्तानी र किको बाइमात्राको यस्तो " भाग मात्र देखिन्छ ।

८. मूल ताडपत्र भाँचिएर गएकोले छबोको डिकोको केही अंश मात्र देखिन्छ ।

९. छैटौं पङ्क्ति झण्डै षष्ठांश ठाउँ छोडेर उठाइएको छ ।

१. वि. सं. १९०५ फाल्गुनकृष्ण (पूर्णान्तमानले)

| गते | वार | तिथि | घडी | पला | |
|---|---|---|---|---|---|
| माघ २९ | शुक्र | द्वितीया | २२ । | ० | (पात्रोबाट) |

CC-0. Nepal Sanskrit Academy, Kathmandu



३. उप्रांत तिमिले ताहा बसि पढनामा मिहिनेत गऱ्याको विस्तार वकील मद-
४. नमोहन तेवारीले आहा हामिसित विस्तार गर्दा तिमिवेषी बुसि लाग्यो. प-
५. ढन लाग्यापछि तेस्तै हो. मिहिनेत गरि पढदा रह्याछौ. बढिया हो. अबउप्रांत प-
६. नि येस्तै मिहिनेत गरि पढन्या काम गर्नु. पढनामा मिहिनत गरि पढ्यौ र
७. आउदामा तोपको इलमहरू पनि सिकि आयो भन्या तिमिलाई बेहत्तर
८. हुन्याछ. सो बुझि मिहिनेत गरि पढन्या र इलम सिकन्या काम गर. शुभम्

(परराष्ट्रमन्त्रालयको १६७ सङ्ख्याको खाममा यसको मस्यौदा छ । वि. सं. २०३८ मार्ग ९ गते यो पत्र मैले सारेको हुँ । )

□

# बेलायततिर लागेका जङ्गबहादुरलाई भाइ बद्रीनरसिंहले लेखेको अप्रकाशित पत्र

– दिनेशराज पन्त

श्री ६

१. सं १९०६ साल माघशुदि ५ रोज ६[1] श्रीकम्यान्डरइनचिफ् जनरलबाट
२. श्रीप्राईममिनिष्टर राणाजीके
३. उप्रांत श्री ५ महाराजधिराजबाट अघिका रीतबमोजिम् बसंत सुनीबक्सनु-
४. भयो. श्री ५ महाराजाधिराज तिन महारानी श्रीसाहेबज्यू श्रीमैञासाहेबज्यू
५. सबैका गाथमा आराम छ. थापाथलिघरमा पनि सबैलाई आराम छ.
६. आहाबाट पावलागीबक्सनुभयापछिको चरणको कुशलक्षेम केही नआउदा
७. किन आयेन भंन्या चित्तमा लागिरहंछ. मुकाममुकामको च-
८. रणको कुशलक्षेमसहीत शिक्षाअर्ति बक्सी पठाउदै रहनुभया चित्त आनन्द र-
९. हला. दुर्जेलिङ्बाट किमलसाहेबले कुम्भेदान गजराज काकिलाई
१०. लेख्याको बिजिनिस् चिठि कप्तान बलमर्दन थापाले पठायाको रहेछ. सो चि-
११. ठि बिजिनीस् चन्हाई पठायाको छ. दाषील होला.

(परराष्ट्रमन्त्रालयको १६८ सङ्ख्याको खाममा यसको मस्यौदा छ । वि. सं. २०३८ मार्ग ९ गते यो पत्र मैले सारेको हुँ । )

□

---

२. वि. सं. १९०६ माघशुक्ल

| | गते | वार | तिथि | घडी | पला |
|---|---|---|---|---|---|
| माघ | ७ | शुक्र | पञ्चमी | ४० । | ४ |

(छापिएको भारतीय पात्रोबाट)

CC-0. Nepal Sanskrit Academy, Kathmandu

# दैवज्ञशिरोमणिलक्ष्मीपतिना

(वि. सं. १८१५–१८८८)

# विरचितस्य रत्नदीपस्य मूलभागस्

# तस्य प्रतिसंस्कृतरूपं च

प्रतिसंस्कर्ता

**नयराजपन्तः**

सहायकाः

**रामजीतेवारी**

(वि. सं. १९७३–२०४०)

**देवीप्रसादभण्डारी**

**रुक्मनाथपौडेलः**

CC-0. Nepal Sanskrit Academy, Kathmandu

# अथ ग्रहध्रुवाधिकारः

पञ्चदेवतानमस्काररूपं मङ्गलं कुर्वन् ग्रन्थारम्भं प्रतिजानीते ।

मूलपाठः

श्रीहेरम्बं माधवं वामदेवं नत्वा देवीं भास्करं शिष्यतुष्ट्यै ।
ब्रूते कृष्णानन्दजो रत्नदीपं गोभूमेघो १७१९ ने शके सौरसूत्रात् ॥१॥

प्रतिसंस्कृतपाठः

श्रीहेरम्बं माधवं वामदेवं नत्वा देवीं भास्करं शिष्यतुष्ट्यै ।
ब्रूते कृष्णानन्दजो रत्नदीपं गोभूमेघैस् १७१९ तुल्यशाके[1]ऽर्कसूत्रात् ॥१॥

द्रव्यशाहसंवत्सरानयनं वर्षगणसाधनं चाह ।

मूलपाठः

शाकः शशीभेन्द्र १४८१ विहीनितः स्याद् गोरक्षशैलाधिपतेः शकाब्दः ।
श्रीद्रव्यसाहस्य स एव नागानलाक्षि २३८ हीनोऽत्र मया कृतोऽब्दः ॥२॥

प्रतिसंस्कृतपाठः

शाकाब्दा भूनागशक्रैर् १४८१ विहीना गोरक्षेश–द्रव्यशाहस्य[2] राज्यात् ।
वर्षाणि स्युः प्रोज्झ्य नागाग्निबाहूँस् २३८ तेभ्यो ग्रन्थे वर्षसङ्घः कृतोऽत्र ॥२॥

द्रव्यशाहसंवत् = शकसंवत् – १४८१ । वर्षगणः = द्रव्यशाहसंवत् – २३८ ।

---

१. संवत्सरे वैक्रमनामधेये पृषत्कवह्निक्षितिभिर् १३५ विहीने ।
शाकाभिधानेन भुवि प्रसिद्धः संवत्सरः स्याद् गणकैः प्रयुक्तः ॥
शकसंवत् = विक्रमसंवत् – १३५ ।

२. द्रव्याभिधो लम्जुङपालकस्य तनूद्भवः शाहकुलप्रसूतः ।
रसेन्दुषड्भू १६१६ मितवैक्रमाब्दे गोरक्षदेशेश्वरताम् अवाप ॥
संवत्सरे वैक्रमनामधेये वेदेषुनागावनिभिर् १८५४ विहीने ।
स्याद् रत्नदीपेऽत्र समासमूहो दैवज्ञलक्ष्मीपतिना प्रणीते ॥
वर्षगणः = विक्रमसंवत् – १८५४ । अस्मिन् ग्रन्थे वर्षगणः 'व' इति सङ्केतेन व्यवह्रियते ।

CC-0. Nepal Sanskrit Academy, Kathmandu



स्पष्टसूर्यजमेषसङ्क्रान्तिकालसाधनम् आह ।

मूलपाठः

अब्दौघः स्वपदा $\frac{1}{4}$ न्वितः शशियम २१ घ्नाब्दः स्वखेषुत्रिभू १३५०
भागाढ्यो यमवाजि ७२ भिर्विरहितोऽभ्राभ्राब्धिपक्षो २४०० द्धृतः ।
लब्धेनाऽथ युतः कृतान्त २ सहितः शैलै ७ र्विहृच्छेषकः
सूर्याजक्रमजो दिनादिक इहोष्णांशोर्भवेद् वासरः ।।३।।

प्रतिसंस्कृतपाठः

अब्दौघः स्वचतुर्थभाग $\frac{1}{4}$ सहितः कार्योऽथ भूलोचनैर् २१
निघ्नो वर्षगणः स्वखेषुगुणभू १३५० भागैर् युतो द्व्यद्रिभिः ७२ ।
हीनोऽभ्राभ्रजिनैर् २४०० हृतोऽथ फलयुक् पूर्वा युतिर् नेत्र २ युक्
स्याद् वारादिक उष्णगोर् दिनमणेर् मेषप्रवेशोद्भवः ।।३।।

$$\text{मेषसङ्क्रान्तेर् वारादिः} = \text{अब्दपः} = \text{व} + \frac{1}{4}\,\text{स्व} + \frac{२१\,\text{व} + \frac{१३५०}{४}\,\text{स्व} - ७२}{२४००} + २$$

सप्ता७धिका वारसङ्ख्या सप्तभिस् ७ तक्षणीया । रत्नदीपे साधितोऽब्दपः स्पष्टरवेर् मेषसङ्क्रान्तिजो वारादिर् इति ज्ञेयम् ।

देशान्तरसंस्कारसाधनं मेषसङ्क्रान्तिकाले तत्संस्करणं चरसंस्करणं चाह ।

मूलपाठः

अङ्घ्रयू $\frac{1}{4}$ नरेखापरपूर्वयोजनैः पलैर्वियुग् युक् सचरः स्वदेशजः ।

प्रतिसंस्कृतपाठः

रेखादेशाद् योजनैर् यैः प्रतीच्यां प्राच्यां वा स्वो देश आस्ते च तानि ।
स्वाङ्घ्रयू $\frac{1}{4}$ नानि स्युर् विघट्यः क्षयं स्वं ताः संस्कुर्याद् मेषसङ्क्रान्तिकाले ।।४।।
तद्घस्रजातेन चरेण संयुतो मेषार्ककालः स भवेत् स्वदेशजः ।

रेखान्तरपलानि = रेखान्तरयोजनानि − $\frac{1}{4}$ स्व ।

रेखादेशात् स्वे देशे पूर्वस्यां दिशि सति रेखान्तरपलानि धनात्मकानि, पश्चिमायां दिशि सति ऋणात्मकानि भवन्ति ।

स्वदेशे मेषसङ्क्रान्तिकालः = गणिताब्दपः ± रेखान्तरपलानि + मेषसङ्क्रान्तिदिनोद्भवानि स्वदेशजानि चरपलानि ।

CC-0. Nepal Sanskrit Academy, Kathmandu



ग्रहाणां कलादिका दैनिकीर् मध्यमा गतीर् आह ।

मूलपाठः

रवेर्नवाक्षा ५९ भुजगाः ८ कलानिधेः खनन्दशैलाः ७९० शरवह्नयो ३५ गतिः ॥४॥
चन्द्रोच्चजा तर्क ६ कलाः कुवेदाः ४१ पातस्य रामाः ३ कुभुवो ११ विलोमा ।
भूराम ३१ घट्योऽङ्गयमाः २६ कुजस्य जीवस्य पञ्चाऽर्कसुतस्य पक्षौ २ ॥५॥
ज्ञोच्चस्य पञ्चाब्धियमा २४५ द्विरामाः ३२ शुक्रोच्चजा षष्णवति ९६ र्भुजङ्गाः ८ ।

प्रतिसंस्कृतपाठः

रवेर् नवाक्षाणि ५९ गजाः ८ कलानिधेः खनन्दशैलाः ७९० शरवह्नयो ३५ विधोः ॥५॥
मान्दाख्यतुङ्गस्य रसाः ६ कुवेदाः ४१ पातस्य रामाः ३ कुभुवो ११ विलोमा ।
धरागुणा ३१ अङ्गयमाः २६ कुजस्य जीवस्य पञ्चाऽर्कसुतस्य पक्षौ २ ॥६॥
ज्ञाशूच्चजा पञ्चजिना २४५ द्विरामाः ३२ शुक्राशुतुङ्गप्रभवा रसाङ्काः ९६ ।
गजाः ८ कलादिर् दिनभुक्तिरुक्ता

ग्रहाणां दैनिक्यो मध्यमा गतयः

| | कलाः | विकलाः | | कलाः | विकलाः |
|---|---|---|---|---|---|
| सूर्यस्य | ५९ | ८ | बृहस्पतेः | ५ | ० |
| चन्द्रस्य | ७९० | ३५ | शनेः | २ | ० |
| चन्द्रमन्दोच्चस्य | ६ | ४१ | बुधशीघ्रोच्चस्य | २४५ | ३२ |
| चन्द्रपातस्य | ३ | ११ | शुक्रशीघ्रोच्चस्य | ९६ | ८ |
| मङ्गलस्य | ३१ | २६ | | | |

बीजसाधनम् आह ।

मूलपाठः

अजार्कघट्यः स्वजवैर्विनिघ्ना बीजानि षष्ट्या६०प्तकलामुखानि ॥६॥
बीजोनितास्ते गणितागताः स्युः खेटा रवेरौदयिका ध्रुवांशाः ।

प्रतिसंस्कृतपाठः

ऽथ मेषसङ्क्रान्तिजनाडिकादिः ॥७॥
हतो द्युगत्या खचरस्य यस्य षष्ट्या ६० विभज्येत खगस्य तस्य ।
जायेत बीजं कलिकादिरूपं बीजानि साध्यानि नभश्चराणाम् ॥८॥

मेषसङ्क्रान्तिदिने स्वदेशजात् सूर्योदयात् स्वदेशजमेषसङ्क्रान्तिकालं यावद् वर्तमाने समये जायमाना मध्यमा ग्रहगतिर् अत्र बीजशब्देन विवक्षिता ।

CC-0. Nepal Sanskrit Academy, Kathmandu



ग्रहस्य कलादिकं बीजम् = $\frac{\text{दैनिकी मध्यमगतिः} \times \text{मेषसङ्क्रान्तिघट्यादिः}}{६०}$

प्रतिसंस्कृते रत्नदीपे बीजसंस्करणम् अस्याऽधिकारस्याऽन्ते वक्ष्यते ।

मेषसङ्क्रान्तिकालभवं स्थिरं सूर्यध्रुवम् आह ।

मूलपाठः

शैलेषुरामाः ३५७ कुशरा ५१ गजाक्ष ५८ मिता ध्रुवांशास्तरणेः सदोक्ताः ।।७।।

प्रतिसंस्कृतपाठः

मेषप्रवेशे स्फुटतिग्मरश्मेः स्याद् मेषसङ्क्रान्तिरथांऽशुमाली ।
मध्यस् तदा स्यात् प्रमितो लवाद्यैः शैलेषुरामैः ३५७ कुशरैर् ५१ गजाक्षैः ५८ ।।९।।

सूर्यध्रुवः= लङ्कादेशजस्पष्टमेषसङ्क्रान्तिकालभवो मध्यमः सूर्यः = ३५७ । ५१ । ५८ (अंशादिः)

चन्द्रध्रुवसाधनम् आह ।

मूलपाठः

द्वित्रीन्दु १३२ निघ्नोऽब्दचयः स्वशून्याचलेन्दु १७० भागेन गजेषुरूपैः १५८ ।
समन्वितोंऽशादिशशी स्वपङ्क्ति १० भागान्विताब्दार्क १२ लवैः कलाढ्य ।।८।।

प्रतिसंस्कृतपाठः

वर्षौघो भुजवह्निचन्द्र १३२ गुणितः स्वाभ्राद्रिभू १७० भागयुक्
स्याद् अंशादि फलं स्वकीयखमही १० भागाढ्यवर्षव्रजः ।
भक्तो द्वादशभिः १२ कलादिकफलं स्यात् तत्फलद्वन्द्वजो
योगो नागशरावनी १५८ लवयुतः स्याद् यामिनीवल्लभः ।।१०।।

चन्द्रध्रुवः = $\left(१३२\ व + \frac{१}{१७०}\ स्व\right)$ अंशादिः + $\left(\frac{व + \frac{१}{१०}\ स्व}{१२}\right)$ कलादिः + १५८ अंशाः

चन्द्रमन्दोच्चध्रुवसाधनम् आह ।

मूलपाठः

रूपाब्धि ४१ निघ्नोऽब्दगणः स्वनन्दार्कां १२९ शोनितोऽङ्गाद्रियमैः २७६ खपक्षैः २० ।
युतो विधूच्चं सनिजाभ्रनेत्रां २० शाब्दाङ्गचन्द्रां १६ शकलायुतः स्यात् ।।९।।

प्रतिसंस्कृतपाठः

वर्षाणां निवहः कुसिन्धु ४१ निहतः स्वाङ्कार्क १२९ भागोनितो
भागाद्यो रिपुभैर् २७६ लवैः खनयनैर् २० लिप्ताभिरप्यन्वितः ।

CC-0. Nepal Sanskrit Academy, Kathmandu



स्वीयाभ्राक्षि २० लवान्विताब्दगणषट्चन्द्रां १६ शलिप्तान्वितः
सम्पद्येत लवादिकं कुमुदिनीनाथस्य तुङ्गं मृदु ॥११॥

चन्द्रमन्दोच्चध्रुवः =

$$\left(४१\,व - \frac{१}{१२९}\,स्व\right)\ \text{अंशादिः} + \left(\frac{व + \frac{१}{२०}\,स्व}{१६}\right)\ \text{कलादिः} + २७६\,।\,२०\ \text{(अंशादिः)}$$

चन्द्रपातध्रुवसाधनम् आह ।

मूलपाठः

नखा २० हताब्दो निजभूगुणां ३१ शैर्हीनः समार्कां १२ शकलिप्तिकोनः ।
शराङ्ग ६५ हीनो विपरीतगत्या चक्राद् ३६० विशुद्धो भवतीन्दुपातः ॥१०॥

प्रतिसंस्कृतपाठः

वर्षौघः खभुजा २० हतो निजमहीवह्न्यं ३१ शकैर् ऊनितः
स्याद् भागादिक इन्द्रियाहित ६५ मितैर् अंशैर् विहीनः पुनः ।
वर्षौघस्य भुजावनी १२ लवमितैर् लिप्तादिभिर् वर्जितो
भांशेभ्यः ३६० परिशोधितो लवमुखश् चन्द्रस्य पातो भवेत् ॥१२॥

$$\text{फलम्} = \left(२०\,व - \frac{१}{३१}\,स्व\right)\ \text{अंशादि} - \left(\frac{व}{१२}\right)\ \text{कलादि} - ६५\ \text{अंशाः}$$

सति सम्भवे फलं भांशैस् ३६० तक्षणुयात् । शेषं भांशेभ्यः ३६० शोधयेद् राहुध्रुवः स्यात् । फले भांशेभ्यो ३६० न्यूने तु तत् फलम् एव भांशेभ्यः ३६० शोधयेद् राहुध्रुवः स्यात् ।

भौमध्रुवसाधनम् आह ।

मूलपाठः

अब्दोऽश्विनन्देन्दु १९२ हतः स्वशून्यदन्तां ३२० शहीनो नववेद ४९ युक्तः ।
भूयोऽब्दपञ्चाद्रिगुणां ३७५ शयुक्तो भौमध्रुवः स्याद्

प्रतिसंस्कृतपाठः

नयननवमहीभिः १९२ संगुणो वर्षसङ्घः खभुजगुण ३२० समानैः स्वीयभागैर् विहीनः ।
शरगिरिगुण ३७५ भागैर् वर्षसङ्घस्य युक्तो नवकृत ४९ लवयुक्तो भागपूर्वः कुजः स्यात् ॥१३॥

$$\text{भौमध्रुवः} = \left(१९२\,व - \frac{१}{३२०}\,स्व\right)\ \text{अंशादिः} + \left(\frac{व}{३७५}\right)\ \text{अंशादिः} + ४९\ \text{अंशाः}$$

CC-0. Nepal Sanskrit Academy, Kathmandu



बुधशीघ्रोच्चध्रुवसाधनम् आह ।

मूलपाठः

अथ बोधनोच्चम् ॥११॥

बाणेषु ५५ निघ्नः स्वखषड्यमां २६० शैरर्कै १२ जिनैः २४ कृशग्नि ३१ लवैर्विहीनः ।

प्रतिसंस्कृतपाठः

वर्षौघो विषयेन्द्रियैर् ५५ विनिहतो व्योमारिबाहू २६० न्मितैः
स्वैर् भागै रहितः समागणमहीवह्न्यं ३१ शकैर् ऊनितः ।
सम्पद्येत लवादिको भुजकुभिर् १२ भागैः समुद्राक्षिभिर् २४
लिप्ताभी रहितो भवेल् लवमुखं सौम्यस्य तुङ्गं चलम् ॥१४॥

बुधशीघ्रोच्चध्रुवः = $\left(५५\,व - \frac{१}{२६०}\,स्व\right)$ अंशादिः − $\left(\frac{व}{३१}\right)$ अंशादिः − १२ । २४ (अंशादिः)

बृहस्पतिध्रुवसाधनम् आह ।

मूलपाठः

जीवोंऽश ३० निघ्नोऽद्रिगजां ८७ शयुक्तः साब्दद्विभूयां १६२ श इलाग्नि २१ हीनः ॥१२॥

प्रतिसंस्कृतपाठः

त्रिंशद् ३० निघ्नो वर्षसङ्घः स्वकीयैर् भागैर् युक्तः सप्तनाग ८७ प्रमाणैः ।
युक्तो वर्षस्तोमदोर्भूप १६२ भागैः स्वर्गां २१ शोनः स्याद् गुरुर् भागपूर्वः ॥१५॥

बृहस्पतिध्रुवः = $\left(३०\,व + \frac{१}{८७}\,स्व\right)$ अंशादिः + $\left(\frac{व}{१६२}\right)$ अंशादिः − २१ अंशाः

शुक्रशीघ्रोच्चध्रुवसाधनम् आह ।

मूलपाठः

तत्त्वाश्वि २२५ घ्नः स्वाभ्रवेदेश ११४० भागैर्युक्तः सार्द्धाष्टाग्नि २८½ हीनः सितोच्चम् ।

प्रतिसंस्कृतपाठः

तत्त्वाश्वि २२५ घ्नो वर्षसङ्घः स्वकीयैर् भागैः शून्याब्धीश ११४० तुल्यैः समेतः ।
अंशैः सार्धैर् अष्टदोर्भिर् २८½ विहीनो भागाद्यं स्याच् शीघ्रतुङ्गं सितस्य ॥१६॥

शुक्रशीघ्रोच्चध्रुवः = $\left(२२५\,व + \frac{१}{११४०}\,स्व\right)$ अंशादिः − २८ । ३० (अंशादिः)

CC-0. Nepal Sanskrit Academy, Kathmandu



शनैश्चरध्रुवसाधनम् आह ।

मूलपाठः

अर्क १२ घ्नोऽङ्गाक्षां५६शनन्दर्तु ६९ युक्तो वर्षाभ्राभ्रेन्द्रां १४०० शयुक् सूर्यसूनुः ।।१३।।

प्रतिसंस्कृतपाठः

सूर्यैर् १२ निघ्नो वर्षसङ्घः स्वकीयैः षट्पञ्चां५६ शैः संयुतो नन्दषड्भिः ६९ ।
अंशैर् युक्तो वर्षसङ्घाभ्रशून्यशक्रां १४०० शैर् युग् भागपूर्वः शनिः स्यात् ।।१७।।

शनैश्चरध्रुवः= $\left(१२\,व + \frac{१}{५६}\,स्व\right)$ अंशादिः + $\left(\frac{व}{१४००}\right)$ अंशादिः + ६९ अंशाः

सूर्योदयकाले मध्यमग्रहसाधनम् आह ।

एते खेटा वर्षसङ्घप्रजाताः सम्पद्येरन् मेषसङ्क्रान्तिकाले ।
बीजोनाः स्युस् तद्दिनादौ ध्रुवाख्यास् ते संयोज्या घस्रसङ्घोत्थखेटैः ।।१८।।
मेषार्कघस्रोत्थचरेण संस्कृतं देशान्तराख्यं प्रथमं व्यधायि ।
मेषार्कघस्रे तु तदेव युक्तम् अन्यत्र देशान्तरमेव युक्तम् ।।१९।।
बीजस्य सिद्धौ विधियुग्ममेव सांवत्सरः स्वे हृदये दधीत ।
लक्ष्मीपतेर् उक्तिमिह प्रचिन्त्य बुद्ध्येत विद्वान् उपपत्तिमत्र ।।२०।।

वर्षसङ्घेन साधिता एते ध्रुवाख्या ग्रहा मेषसङ्क्रान्तिकाले मध्यमा ग्रहा भवन्ति । ते पूर्वसाधितैः स्वैर् बीजैर् ऊनिताः सन्तो मेषसङ्क्रान्तिदिने स्वदेशजे सूर्योदयकाले मध्यमा ग्रहा भवन्ति । मेषसङ्क्रान्तिदिनाद् अन्येषु दिवसेषु तु चरेणाऽसंस्कृताद् देशान्तरमात्रात् साधितानि बीजान्येव वर्षसङ्घेन साधितेभ्यो ध्रुवाख्येभ्यो ग्रहेभ्यो वियुञ्जीत । वियोगजातेषु फलेष्वहर्गणोत्पन्नान् ग्रहान् संयुज्याऽभीष्टदिने मध्यमान् ग्रहान् साधयेत् ।

अस्याऽधिकारस्योपसंहारम् आह ।

दैवज्ञलक्ष्मीपतिना कृतस्य सिद्धान्तसारस्य लघुक्रियस्य ।
ग्रहध्रुवाणां गणनाधिकारः सुबोधहेतोः प्रतिसंस्कृतोऽभूत् ।।२१।।

इति दैवज्ञशिरोमणिना लक्ष्मीपतिशर्मणा विरचितस्य सिद्धान्तसारस्य
रत्नदीपस्य प्रतिसंस्कृते रूपे ग्रहध्रुवाधिकारः ।।१।।

□

CC-0. Nepal Sanskrit Academy, Kathmandu

# अथ पञ्चाङ्गाधिकारः

अयनांशसाधनम् आह ।

मूलपाठः

गताब्दयुक्ता गजनन्दसूर्याः १२९८ स्वदिग् १० लवोना विहृताः खतर्कैः ६० ।
स्युस्तेऽयनांशाः

प्रतिसंस्कृतपाठः

वर्षौघयुक्ता गजनन्दसूर्याः १२९८ स्वदिग् १० लवोना विहृताः खतर्कैः ६० ।
भवेयुरंशा अयनाभिधानाः श्रीसूर्यसिद्धान्तविधानसिद्धाः ॥१॥

अयनांशाः = $\left\{\frac{(व + १२९८) - \frac{१}{१०} स्व}{६०}\right\}$ अंशाद्याः

पलभास्वरूपम् आह ।

मूलपाठः

पलभा भवेत् साऽयनाजसङ्क्रान्तिदिनार्द्धजा भा ॥१॥

प्रतिसंस्कृतपाठः

अयनांशयुते स्फुटे रवौ गगनाङ्गत्रि ३६० लवैः समे सति ।
मिहिरा १२ ङ्गुलशङ्कुजा प्रभा दिनमध्यप्रभवाऽक्षभा स्मृता ॥२॥

सायने स्पष्टसूर्ये मेषादौ सति द्वादशा १२ ङ्गुलस्य शङ्कोर् मध्याह्नकालजा छाया तद्देशोद्भवा पलभा भवति ।

चरखण्डसाधनम् आह ।

मूलपाठः

पलभा खगुणै ३० र्जिनैः २४ खरूपै १० र्गुणिता राम ३ हृता चरार्द्धकानि ।

प्रतिसंस्कृतपाठः

पलभां खगुणैर् ३० जिनैः २४ खरूपैर् १० गुणयित्वा ज्वलनैः ३ पृथग् भजेत ।
भुजराशिभवानि खण्डकानि चरनामानि पलात्मकानि हि स्युः ॥३॥

CC-0. Nepal Sanskrit Academy, Kathmandu



अस्मिन् ग्रन्थे पलभा 'प' इति सङ्केतेन द्योत्यते ।[1]

प्रथमं पलात्मकं चरखण्डम् = $\frac{३० प}{३}$ = १० प । द्वितीयं पलात्मकं चरखण्डम् = $\frac{२४ प}{३}$ = ८ प ।

तृतीयं पलात्मकं चरखण्डम् = $\frac{१० प}{३}$ ।

चरसाधनम् आह ।

मूलपाठः

अयनांशयुगर्कदोर्भजानां युतिरग्रचघ्नलवां ३० शयुक् चरार्द्धम् ॥२॥

प्रतिसंस्कृतपाठः

सायनांशतरणेर् भुजराशितुल्यसङ्ख्यचरखण्डसमासे ।
एष्यखण्डहतशेषलवादेर् युङ्धि खाग्नि ३० लवमिष्टचरं स्यात् ॥४॥

सायनांशस्य सूर्यस्य भुजराशिसङ्ख्यायाम् एक १ मितायां प्रथमं चरखण्डं गतं भवति । सायनांशस्य सूर्यस्य भुजराशिसङ्ख्यायां द्वि २ मितायां द्वितीयं चरखण्डं गतं भवति । अवशिष्टान् अंशादीन् एष्यचरखण्डेन गुणयित्वा त्रिशता ३० भजेल् लब्धं फलं गतचरखण्डयोगे युञ्जीताऽभीष्टं चरं स्यात् । सायनांशस्य सूर्यस्य भुजराशिसङ्ख्यायां त्रि ३ मितायां तु त्रयाणां चरखण्डानां योग एवाऽभीष्टं चरं भवति । चरं पलात्मकं भवति ।

अहर्गणसाधनम् आह ।

मूलपाठः

अजादिगार्कवासराद् गतो भवेदहर्गणोऽथवा मधोः सितात् तिथेर्गणः सभादितिथ्ययुक् ।
अधश्चतूरसै ६४ र्हृतावमैर्विहीनितो भवेदहर्गणो

प्रतिसंस्कृतपाठः

अहर्गणस्य परिभाषाम् आह ।

यस्मिन् घस्रे स्पष्टसूर्योऽजराशिं यातस् तस्माद् वासराद् इष्टघस्रम् ।
यावद् याता वासरा ये भवेयुस् तेषां सङ्ख्या ऽहर्गणः प्रोच्यतेऽत्र ॥५॥

स्पष्टसूर्यस्य मेषसङ्क्रान्तिदिवसाद् इष्टं दिवसं यावद् व्यतीताः सावनदिवसा अस्मिन् ग्रन्थे अहर्गणनाम्ना व्यवह्रियन्ते ।

सौरमासान् सौरदिवसांश् चोपकरणीकृत्याऽहर्गणसाधने सङ्क्रान्तीनां वारादयो ज्ञातव्या भवन्ति । तदर्थं मेषादिसङ्क्रान्तीनां क्षेपकाः प्रदर्श्यन्ते ।

---

१. नेपालभूपालकराजधान्यां षडङ्गुला सेषुलवा (६।१२) पलाभा ।
पक्षर्तवः ६२ शून्यशराः ५० कुपक्षाः २१ पलस्वरूपाणि चरार्धकानि ॥

CC-0. Nepal Sanskrit Academy, Kathmandu



| सङ्क्रान्तयः | वारादिसंक्षेपकाः | | | सङ्क्रान्तयः | वारादिसंक्षेपकाः | | |
|---|---|---|---|---|---|---|---|
| | वा | घ | प | | वा | घ | प |
| मेषः | ० | ० | ० | तुला | ४ | ५५ | ४८ |
| वृषः | २ | ५७ | १ | वृश्चिकः | ६ | ४८ | ३१ |
| मिथुनम् | ६ | २३ | १ | धनुः | १ | १७ | ११ |
| कर्कटः | ३ | ० | ५१ | मकरः | २ | ३६ | ४ |
| सिंहः | ६ | ३० | ४ | कुम्भः | ४ | ३ | १५ |
| कन्या | २ | ३० | २९ | मीनः | ५ | ५३ | २१ |

इमे क्षेपका मकरन्दसारण्या उद्धृताः। एते प्रत्येकं क्षेपका मेषसङ्क्रान्तेर् वारादिषु योज्याः, प्रत्येकं सङ्क्रान्तीनां वारादयो भवन्ति। आगतानां सङ्क्रान्तिवारादीनां परीक्षायै अधोलिखिता सारण्युपयुक्ता भवति –

| सङ्क्रान्तयः | मेषसङ्क्रान्तेः प्रत्येकं सङ्क्रान्ति यावद् दिनादिकम् | | | प्रत्येकं सौरमासस्य दिनादिकम् | | | सङ्क्रान्तयः | मेषसङ्क्रान्तेः प्रत्येकं सङ्क्रान्ति यावद् दिनादिकम् | | | प्रत्येकं सौरमासस्य दिनादिकम् | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | दि | घ | प | दि | घ | प | | दि | घ | प | दि | घ | प |
| मेषः | ० | ० | ० | ३० | ५७ | १ | तुला | १८६ | ५५ | ४८ | २९ | ५२ | ४३ |
| वृषः | ३० | ५७ | १ | ३१ | २६ | ० | वृश्चिकः | २१६ | ४८ | ३१ | २९ | २८ | ४० |
| मिथुनम् | ६२ | २३ | १ | ३१ | ३७ | ५० | धनुः | २४६ | १७ | ११ | २९ | १८ | ५३ |
| कर्कटः | ९४ | ० | ५१ | ३१ | २९ | १३ | मकरः | २७५ | ३६ | ४ | २९ | २७ | ११ |
| सिंहः | १२५ | ३० | ४ | ३१ | ० | २५ | कुम्भः | ३०५ | ३ | १५ | २९ | ५० | ६ |
| कन्या | १५६ | ३० | २९ | ३० | २५ | १९ | मीनः | ३३४ | ५३ | २१ | ३० | २२ | १० |

अहर्गणसाधनम् आह।

वैशाखाद्याः सौरमासा अतीता ये स्युः सङ्ख्या तद्भवा कुत्रि ३१ निघ्नी।
यातैर् घत्रैर् इष्टसौरस्य मासो युक्ताः, सिध्येद् ईप्सितो घत्रसङ्घः ॥६॥

अहर्गणः = (व्यतीतानां वैशाखादीनां सौरमासानां सङ्ख्या) × ३१ + (वर्तमानस्य सौरमासस्य व्यतीतानां दिवसानां सङ्ख्या)

मार्गादिषु सौरमासेषु वर्तमानेषु सत्स्वहर्गणसाधने विशेषम् आह।

मार्गाद्याश् चेद् ईप्सिताः सौरमासा वैशाखाद्या ऽतीतमासोत्थसङ्ख्या।
त्रिंशद् ३० निघ्नी षड् ६ युता स्वेष्टमासो यातैर् घत्रैः संयुता ऽहर्गणः स्यात् ॥७॥

मार्गादिषु मासेषु वर्तमानेषु अहर्गणः = (व्यतीतानां वैशाखादीनां सौरमासानां सङ्ख्या) × ३० + (वर्तमानस्य सौरमासस्य व्यतीतानां दिवसानां सङ्ख्या) + ६

CC-0. Nepal Sanskrit Academy, Kathmandu



अहर्गणपरीक्षाम् आह ।

घस्रस्तोमे वर्षनाथेन युक्ते सिध्येत् स्वीयो वासरः सप्त ७ तष्टे ।
किञ्चित् क्षिप्त्वाऽहर्गणे वाऽपहाय सङ्गन्तव्यो वासरोऽहर्गणेन ॥८॥

अहर्गणे मेषसङ्क्रान्तिजस्य वारस्य सङ्ख्यां युञ्जीत । योगफलं सप्तभिस् ७ तक्षणुयात् । १ मिते शेषे रविवारः, २ मिते शेषे सोमवार इति क्रमेण स्वदिवसजो वारः स्यात् । वारे सङ्गतेऽहर्गणः शुद्धो भवति । वारे न सङ्गतेऽहर्गणे रूपं १ संयुज्य वियुज्य वा वारसङ्गतिः कर्तव्या । अधिकतयाऽहर्गणे द्वि२मितां सङ्ख्यां युक्त्वा वियुज्य वा वारः सङ्गमनीयः ।

इदानीं सौरमासान् सौरदिवसांश् चोपकरणीकृत्याऽहर्गणः साधितः । अथ चान्द्रमासांश् चान्द्रदिवसान् अर्थात् तिथीश् चोपकरणीकृत्याऽहर्गणसाधनाय चैत्रशुक्लप्रतिपदो मेषसङ्क्रान्ति यावद् वर्तमानाः शुद्धिसंज्ञकास् तिथीः साधयति ।

वर्षौघो धरणीशशाङ्क ११ गुणितः स्वाभ्राद्रिभू १७० भागयुक्
स्यात् तिथ्यादिफलं स्वकीयखमही १० भागाढ्यवर्षव्रजम् ।
वेदेन्द्रैर् १४४ विभजेद् घटीमुखफलं स्यात् तत्फलद्वन्द्वजे
योगे विश्व १३ मितास् तिथीर् नख २० घटीर् युञ्जीत शुद्धिर् भवेत् ॥९॥
एषा शुद्धिस् त्रिंशता ३० तक्षणीया लब्ध्या तुल्याः स्युः प्रयाताधिमासाः ।
शिष्टा सङ्ख्या या भवेत् तां वदन्ति विज्ञाः शुद्धि प्रक्रियायाः प्रसङ्गे ॥१०॥

$$\text{शुद्धिः} = \left(११\,व + \frac{१}{१७०}\,स्व\right)\ \text{तिथ्यादिः} + \left(\frac{व + \frac{१}{१०}\,स्व}{१४४}\right)\ \text{घट्यादिः} + १३।२०\ (\text{तिथ्यादिः})$$

अनया रीत्या समागतायाः शुद्धेस् तिथिसङ्ख्यायां त्रिंशतो ३० धिकायां सा त्रिंशता ३० तक्षणीया । लब्धि-तुल्या गताधिमासा भवन्ति । प्रयोजनाभावात् तेऽधिमासास् त्यक्तव्याः । शेषरूपास् तिथयो घटिकाश् च शुद्धिसंज्ञया ग्राह्याः । अधो वक्ष्यमाणे तिथिगणसाधनप्रसङ्गे शुद्धेस् तिथय एव ग्राह्या घट्यादिकं तु न ग्राह्यम् ।

तिथिगणसाधनम् आह ।

याता यावत् तिथिमभिमतां चैत्रशुक्लादितिथ्याश्
चान्द्रा मासाः खगुण ३० निहता वर्तमानस्य मासः ।
शुक्लस्याऽऽदेर् विगततिथिभिः संयुता वर्तमान-
सौराब्दादिस्थतिथिरहिताः स्यात् तिथीनां गणोऽत्र ॥११॥

तिथिगणः = (व्यतीताश् चैत्रशुक्लादयश् चान्द्रमासाः) × ३० + (वर्तमानस्य चान्द्रमासस्य शुक्लप्रतिपदो व्यतीतास् तिथयः) − शुद्धिः

CC-0. Nepal Sanskrit Academy, Kathmandu



तिथिगणाद् अहर्गणसाधनम् आह ।

तिथिगणं विभजेच्च श्रुतिशत्रुभिः ६४ क्षयतिथिप्रमितिः फलमुच्यते ।
क्षयतिथीस् तिथिसञ्चयतस् त्यजेद् भवति शेषमितिर् द्युगणोऽथवा ॥१२॥

अहर्गण। = तिथिगण: – $\frac{1}{६४}$ स्व

वारेणाऽहर्गणं पूर्ववत् परीक्षेत । क्षयतिथिसाधने घट्यादिकं न ग्राह्यम् ।

सूर्यमन्दोच्चम् आह ।

मूलपाठः

रवेर्गजाद्रयों ७८ शका मृदूच्चजाः ॥३॥

प्रतिसंस्कृतपाठः

भास्करस्य मृदुतुङ्गमिदानीं नागशैल ७८ लवसंमितमास्ते ।[२]
हायनैर् बहुशतैर् अपि भुक्तिस् तद्भवा भवति नो उपलक्ष्या ॥१३॥

सूर्यमन्दोच्चम् = २ । १८ (राश्यादि)

सूर्यमन्दोच्चस्य गतेर् लघिष्ठतमतया गणकैस् तत् स्थिरं स्वीकृत्य गणितं क्रियते ।

मध्यमसूर्यसाधनम् आह ।

मूलपाठः

खाद्रयं ७० शोनोऽहर्गणोऽर्को ध्रुवाढ्योऽहर्वृन्दाभ्रेष्विन्दु १५० भागैः कलोनः ।

प्रतिसंस्कृतपाठः

अहर्गणात् सूर्यसाधनम् आह ।

घस्रस्तोमः स्वखनग ७० लवैर् ऊनितः स्याल् लवादिर्,
घस्रस्तोमो गगनशरभू १५० भाजितः स्यात् कलादिः ।
लब्धं लिप्तादिकमधिगताद् भागपूर्वाज् जहाहि

---

२. सूर्यमन्दोच्चस्यैतावद् मानम् इदम्प्रथमतयाऽऽर्यभटीये समुपलभ्यते । तथाहि ।

सवितुरमीषाञ्च तथा द्वा ऋखि सा हृदा हृल्यखिचयमन्दोच्चम् ॥७॥

(आर्यभटीये गीतिकापादे)

सवितुर्मन्दोच्चं तथा द्वा । दा अष्टादश । वा षष्टिः । अष्टसप्ततिभागान् तथा मेषादितो गत्वा स्थितं सवितुर्मन्दोच्चमित्यर्थः ।

(परमेश्वरः)

CC-0. Nepal Sanskrit Academy, Kathmandu



अत्र ग्रन्थेऽहर्गणः 'अ' इति सङ्केतेन व्यवह्रियते ।

अहर्गणोत्पन्नः सूर्यः = $\left(\text{अ} - \frac{१}{७०}\ \text{स्व}\right)$ अंशादिः - $\left(\frac{\text{अ}}{१५०}\right)$ कलादिः[३]

मध्यमसूर्यसाधनम् आह ।

शेषे युङ्धि ध्रुवमिनभवं मध्यमो भास्करः स्यात् ।।१४।।

मध्यमः सूर्यः = अहर्गणोत्पन्नः सूर्यः + सूर्यध्रुवः

सूर्यमन्दकेन्द्रसाधनं मन्दफलस्य धनर्णत्वं चाह ।

मूलपाठः

द्विष्ठः शुद्धो मार्दवोच्चात् स्वमस्वं मान्दं केन्द्रं भार्द्धं १८० भागाल्पपुष्टे ।।४।।

प्रतिसंस्कृतपाठः

सूर्यमन्दकेन्द्रसाधनम् आह ।

स्वाद् मन्दोच्चाद् मध्यमं तीक्ष्णरश्मिं जह्यात् सिध्येद् मन्दकेन्द्रं खरांशोः ।

सूर्यमन्दकेन्द्रम् = सूर्यमन्दोच्चम् - मध्यमः सूर्यः = २ । १८ (राश्यादि) - मध्यमः सूर्यः

मन्दफलस्य धनर्णत्वम् आह ।

मान्दे केन्द्रे भार्धं १८० भागाल्पपुष्टे तत्संजाता संस्कृतिः स्यात् स्वमस्वम् ।।१५।।

मन्दकेन्द्रे षड्भ्यो ६ राशिभ्यो न्यूनेऽर्थाद् मेषादिकेन्द्रे मन्दफलं धनं स्यात् । मन्दकेन्द्रे षड्भ्यो ६ राशिभ्योऽधिकेऽर्थात् तुलादिकेन्द्रे मन्दफलम् ऋणं स्यात् ।

भुजसाधनम् आह ।

मूलपाठः

विभार्द्धं १८० भागं खनवा ९० धिकं चेत् तच्छोधितं दोः कथितं किलाऽर्यैः ।

प्रतिसंस्कृतपाठः

इष्टा अंशा भार्धं १८० भागाधिकाश् चेद्
इष्टांशेभ्यो भार्धं १८० भागा विशोध्याः ।

---

३. अहर्गणात् सूर्यस्य साधनस्येयम् एव रीतिर् गणेशदैवज्ञेन कथिता । तथाहि ।

स्वखनग ७० लवहीनो द्युव्रजोऽर्कज्ञशुक्राः
खतिथि १५० हृतगणोनो लिप्तिकास्वंशकाद्याः ।।१०।।

(ग्रहलाघवे मध्यमाधिकारे)

CC-0. Nepal Sanskrit Academy, Kathmandu



शून्याङ्केभ्यश् ९० चेल् लवेभ्योऽधिकाः स्युर्
इष्टाः शिष्टा वांऽशकास् ते विशोध्याः ॥१६॥
भार्धां १८० शेभ्यो जायते बाहुरिष्टः
शून्याङ्केभ्यः ९० स्याल् लवेभ्यो लघुर् दोः ।

येषाम् अंशादीनां भुजसाधनम् अपेक्षितं तेंऽशादयो यदि नवतेर् ९० अंशेभ्यो महीयांसो न भवेयुस् तर्हि तेंऽशादय एव भुजसंज्ञां लभेरन् । अभीष्टा अंशादयो यदि साशीतिशताद् १८० अंशेभ्यो महीयांसो भवेयुस् तर्हि तेभ्योंऽशादिभ्यः साशीतिशतं १८० अंशा विशोध्याः । शोधने कृतेऽवशिष्टा वाऽभीष्टा अंशा एव नवतेर् ९० अंशेभ्यो महीयांसश् चेत् स्युस् तर्हि तेंऽशादयः साशीतिशताद् १८० अंशेभ्यः शोध्याः । अवशिष्टा अंशादयो भुजसंज्ञां लभेरन् । भुजः कदापि नवतेर् ९० अंशेभ्यो महीयान् न भवतीति ज्ञेयम् ।

सूर्यस्य मन्दफलसाधनम् आह ।

मूलपाठः

दोर्दिग् १० लवात् स्युः खलु मान्दखण्डा
भोग्यान्तरघ्नांशदशां १० शयुक्ताः ॥५॥
रवेस्त्रिपक्षा २३ विषयाब्धयः ४५ षट्-
तर्काः ६६ शराष्टौ ८५ कुदिशो १०१ ब्धिरुद्राः ११४ ।
त्र्यर्का १२३ गजार्काः १२८ कुगुणेन्दवः १३१ स्युः
षष्ट्युद्धृतास्ते खलु मन्दभागाः ॥६॥

प्रतिसंस्कृतपाठः

बाहोर् भास्वन्मन्दकेन्द्रप्रजाताद्
मान्दाङ्कैः स्यात् तत्फलं वक्ष्यमाणैः ॥१७॥
रवेस् त्रिपक्षा २३ विषयाब्धयः ४५ षट्-
तर्काः ६६ शराष्टौ ८५ कुदिशो १०१ ब्धिरुद्राः ११४ ।
त्र्यर्का १२३ गजार्काः १२८ क्षितिवह्निचन्द्राः १३१
कलात्मका मन्दफलाङ्ककाः स्युः ॥१८॥
दशभिर् १० दशभिर् १० भुजांशकैर् मृदुकेन्द्रप्रभवैर् विवस्वतः ।
मृदुसंस्कृतिजाः कला इमा गणयित्वा क्रमशो निवेशिताः ॥१९॥
मृदुकेन्द्रभुजे वियद् ० मिते मृदुसंस्कारकला वियद् ० भवेत् ।
प्रथमं परिशोध्य चाग्रिमाद् इह खण्डान् अपि साधयेद् बुधः ॥२०॥

CC-0. Nepal Sanskrit Academy, Kathmandu



## सूर्यस्य

| मन्दकेन्द्रभुजांशाः | मन्दफलकलाः | मन्दकलान्तराणि (खण्डाः) | खण्डान्तराणि |
|---|---|---|---|
| ० | ० | | |
| | | २३ | |
| १० | २३ | | १ |
| | | २२ | |
| २० | ४५ | | १ |
| | | २१ | |
| ३० | ६६ | | २ |
| | | १९ | |
| ४० | ८५ | | ३ |
| | | १६ | |
| ५० | १०१ | | ३ |
| | | १३ | |
| ६० | ११४ | | ४ |
| | | ९ | |
| ७० | १२३ | | ४ |
| | | ५ | |
| ८० | १२८ | | २ |
| | | ३ | |
| ९० | १३१ | | ३ |

मन्दफलकलासाधनम् आह ।

केन्द्रोत्थदोर्भागदशां १० शतुल्यसङ्ख्या ऽ। ङ्कलिप्ता अवशेषनिघ्नात् ।
यातैष्ययोर् अङ्ककयोर् वियोगाद् दिग्भिर् १० हृताल् लब्धियुताः फलं स्यात् ।।२१।।

सूर्यस्य मन्दकेन्द्रभुजांशादीन् दशभिर् १० भजेत । लब्धिसङ्ख्या गता मन्दफलकलाः सूचयति । अवशिष्टान् अंशादीन् गतैष्याङ्कानाम् अन्तरेण नाम खण्डेन गुणयित्वा दशभिर् १० विभज्य कलादिकं फलम् आनयेत । तत् फलं गताङ्केषु युञ्जीत । सूर्यस्य मन्दफलं कलादिकं प्रजायते ।

स्पष्टसूर्यसाधनम् आह ।

मूलपाठः

तत्संकृतोऽर्कोऽथ पलैश्चराद्धैर्हीनान्वितः स्पष्टतरः किल स्यात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu



प्रतिसंस्कृतपाठः

मन्दस्पष्टसूर्यसाधनम् आह ।

धने मन्दफले तेन संयुक्तो मध्यमो रविः ।
क्षये तु वर्जितः सिध्येद् मन्दस्पष्टो दिवाकरः ।।२२।।

मध्यमे सूर्ये धनात्मकं तद् मन्दफलं योजनीयम् ऋणात्मकं वियोजनीयं मन्दस्पष्टो रविर् भवति ।

स्पष्टसूर्यसाधनम् आह ।

मेषादौ राशिषट्के ६ सवितरि गदितः सायने सौम्यगोलो
जूकादौ राशिषट्के ६ सवितरि गदितः सायने याम्यगोलः ।
सौम्ये याम्ये विलिप्ताश् चरपलतुलिता हीनयुक्ताः खरांशौ
मन्दस्पष्टे विदध्याद् मिहिरसमुदये स्वे भवेत् स्पष्टसूर्यः ।।२३।।

सायने स्पष्टसूर्ये मेषादिषड् ६ राशिस्थिते सत्युत्तरगोलो भवति । सायने स्पष्टसूर्ये तुलादिषड् ६ राशिस्थिते सति दक्षिणगोलो भवति । उत्तरगोले पूर्वसाधितचरपलतुल्या विकला मन्दस्पष्टसूर्याच् शोधयेत् । स्वे देशे सूर्योदयकाले स्पष्टसूर्यो भवति । दक्षिणगोले तु पूर्वसाधितचरपलतुल्या विकला मन्दस्पष्टसूर्ये युञ्जीत । स्वे देशे सूर्योदयकाले स्पष्टसूर्यो भवति ।

अहर्गणाच् चन्द्रसाधनम् आह ।

मूलपाठः

अह्नां गणो विश्व १३ गुणः स्ववेदाद्रयं ७४ शान्वितोऽह्नां शरलोचनां २५ शैः ।।७।।
कलायुतो

प्रतिसंस्कृतपाठः

विश्व १३ घ्नो घस्रसङ्घः श्रुतितुरग ७४ मितैः स्वैर् लवैर् योजनीयो
भागाद्यः स्याद् दिनौघो विषयभुज २५ हृतो लिप्तिकादिः प्रसिध्येत् ।
एतद्द्वय्याः समासो दिवसगणभवः शीतरश्मिः प्रदिष्टः

अहर्गणोत्पन्नश् चन्द्रः = $\left(\text{१३ अ} + \frac{\text{१}}{\text{७४}}\text{ स्व}\right)$ अंशादिः + $\left(\frac{\text{अ}}{\text{२५}}\right)$ कलादिः

चन्द्रे भुजफलसंस्कारं चरफलसंस्कारं मध्यमचन्द्रसाधनं चाह ।

मूलपाठः

ऽर्कोत्थफलोडु २७ भागैश्चराभ्रभां २७० शैः परिसंस्कृतोऽसौ ।
इन्दुर्ध्रुवाढ्यो

CC-0. Nepal Sanskrit Academy, Kathmandu



प्रतिसंस्कृतपाठः

चन्द्रे भुजफलसंस्कारम् आह ।

सौरं मान्दं कलाद्यं फलमचलभुजैर् २७ भाजितं लिप्तिकाद्यम् ॥२४॥
सिध्येद् बाह्वन्तराख्यं फलममृतकरे चिह्नवत् तत् प्रदेयं

चन्द्रे देयं कलाद्यं भुजफलम् = $\frac{\text{सूर्यस्य कलादि मन्दफलम्}}{२७}$

चन्द्रे चरसंस्कारम् आह ।

शून्यक्ष्माभृद्भुजा २७०प्ता चरपलजमितिः संस्कृतिः स्याच् चराख्या ।
भागाद्या शीतरश्मावधनधनतया गोलयोस् तां प्रदद्याद्

चन्द्रे देयोंऽशादिश् चरसंस्कारः = $\frac{\text{चरपलानि}}{२७०}$

मन्दफलसंस्कारार्हस्य चन्द्रस्य साधनम् आह ।

इत्थं सिद्धो ध्रुवाढ्यो भवति शशधरो मन्दसंस्कारयोग्यः[४] ॥२५॥

---

४. देयं तच् चरमरुणे विलिप्तिकासु
मध्येन्दौ द्वि २ गुणनवो ९द्धृतं कलासु ।
भा २७ प्तं च द्युमणिफलं लवेऽथ वेदा-
ब्ध्यब्ध्यू ४४४ नः खरस ६० हृतः शकोऽयनांशाः ॥७॥

(ग्रहलाघवे रविचन्द्रस्पष्टाधिकारे)

१) सूर्ये देयश् चरसंस्कारः = चरपलतुल्या विकलाः ।

२) चन्द्रे देयश् चरफलसंस्कारः = $\frac{२}{९}$ चरपलतुल्याः कलाः ।

३) चन्द्रे देयोंऽशादिको भुजान्तरसंस्कारः = $\frac{\text{अंशाद्यं सूर्यमन्दफलम्}}{२७}$

४) अयनांशाः = $\frac{\text{शकसंवत् - ४४४}}{६०}$

गणेशदैवज्ञस्य १ सूत्रम् अनुसरंल् लक्ष्मीपतिः सूर्ये चरसंस्कारं करोति (अस्याधिकारस्य २३ श्लोको द्रष्टव्यः) ।

गणेशदैवज्ञस्य २ सूत्रेण चन्द्रे देयः कलात्मकश् चरसंस्कारः = $\frac{२}{९}$ चरपलानि ।

कलात्मकम् इमं संस्कारं लक्ष्मीपतिर् अंशरूपे परिणमयति ।

CC-0. Nepal Sanskrit Academy, Kathmandu



मध्यमश् चन्द्रः = अहर्गणोत्पन्नश् चन्द्रः + चन्द्रध्रुवः ± भुजफलसंस्कारः ± चरसंस्कारः
= मन्दफलसंस्कारयोग्यश् चन्द्रः

अहर्गणोत्पन्ने चन्द्रे चन्द्रध्रुवः सर्वदा योजनीयो भवति। भुजफलसंस्कारश् चरसंस्कारश् च चिह्नानुसारं धनर्णत्वं भजतः।

चन्द्रमन्दोच्चसाधनम् आह।

मूलपाठः

ऽथ दिनग्रहां ९ शो दिनद्वितर्का ६२ शकलासमेतः ॥८॥
ध्रुवान्वितः शीतरुचेर्मृदूच्चं

प्रतिसंस्कृतपाठः

अहर्गणो नन्द ९ हृतो लवादिको द्वितर्क ६२ भक्तो द्युगणः कलादिकः।
ध्रुवान्विता संयुतिरेतयोर् भवेद् मृदूच्चमंशादि तुषारदीधितेः ॥२६॥

अहर्गणोत्पन्नं चन्द्रमन्दोच्चम् = $\left(\frac{अ}{९}\right)$ अंशादि + $\left(\frac{अ}{६२}\right)$ कलादि

चन्द्रमन्दोच्चम् = अहर्गणोत्पन्नं चन्द्रोच्चम् + चन्द्रोच्चध्रुवः।

स्पष्टचन्द्रसाधनम् आह।

मूलपाठः

कृत्वाऽर्कवत् स्यादमृतांशुरस्मात्।
इन्दोस्त्रिबाणा ५३ युगशून्यचन्द्राः १०४
पक्षेषुचन्द्राः १५२ शरनन्दचन्द्राः १९५ ॥९॥

---

अतश् चन्द्रे देयोंऽशादिकश् चरसंस्कारः = $\frac{२ \text{ चरपलानि}}{९ \times ६०}$ = $\frac{\text{चरपलानि}}{२७०}$

(अस्याधिकारस्य २५ श्लोको द्रष्टव्यः)।

गणेशदैवज्ञस्य ३ सूत्रेण चन्द्रे देयोंऽशादिको भुजान्तरसंस्कारः = $\frac{\text{अंशाद्यं सूर्यमन्दफलम्}}{२७}$

गणेशदैवज्ञः सूर्यमन्दफलम् अंशरूपं साधयति (ग्रहलाघवस्य रविचन्द्रस्पष्टाधिकारस्य २ श्लोको द्रष्टव्यः)। लक्ष्मीपतिस् तु फलादिकं सूर्यमन्दफलं साधयति (अस्याधिकारस्य २१ श्लोको द्रष्टव्यः)। अतश् चन्द्रे देये भुजफलसंस्कारेऽपि लक्ष्मीपतिना गणेशदैवज्ञस्य रीतिर् अनुसृतेति स्पष्टम् (अस्याधिकारस्य २४ श्लोको द्रष्टव्यः)।

गणेशदैवज्ञस्य ४ सूत्रेण ४४४ शकेऽर्याद् ५७९ वैक्रमाब्देऽयनांशाभावस् तथाऽयनांशानां वार्षिकी गतिर् एक १ कलाभिता सिध्यति। लक्ष्मीपतिस् तु ५५६ वैक्रमाब्देऽयनांशाभावं स्वीकरोति तथाऽयनांशानां वार्षिकीं गतिं ५४ विकलाश् च स्वीकरोति (अस्याधिकारस्य १ श्लोको द्रष्टव्यः)।

CC-0. Nepal Sanskrit Academy, Kathmandu



दन्ताश्विनो २३२ द्व्यङ्गयमाः २६२ शराष्टा-
क्षीण्य २८५ ष्टगोक्षीणि २९८ गुणाभ्ररामाः ३०३ ।

प्रतिसंस्कृतपाठः

चन्द्रस्य मान्दाङ्कान् आह ।

इन्दोस् त्रिबाणा ५३ युगशून्यचन्द्राः १०४ पक्षेषुचन्द्राः १५२ शरनन्दचन्द्राः १९५ ।
दन्ताश्विनो २३२ लोचनशत्रुपक्षाः २६२ शराष्टपक्षा २८५ गजनन्दपक्षाः २९८ ।।२७।।
गुणाभ्ररामाः ३०३ क्रमशः प्रदिष्टाः कलात्मका मन्दफलोद्भवाङ्काः ।

चन्द्रस्य

| मन्दकेन्द्रभुजांशाः | मन्दफलकलाः | मन्दकलान्तराणि (खण्डाः) | खण्डान्तराणि |
|---|---|---|---|
| ० | ० | | |
| | | ५३ | |
| १० | ५३ | | २ |
| | | ५१ | |
| २० | १०४ | | ३ |
| | | ४८ | |
| ३० | १५२ | | ५ |
| | | ४३ | |
| ४० | १९५ | | ६ |
| | | ३७ | |
| ५० | २३२ | | ७ |
| | | ३० | |
| ६० | २६२ | | ७ |
| | | २३ | |
| ७० | २८५ | | १० |
| | | १३ | |
| ८० | २९८ | | ८ |
| | | ५ | |
| ९० | ३०३ | | ५ |

चन्द्रमन्दकेन्द्रसाधनम् आह ।

स्वमन्दतुङ्गाच् शशिनं विशोध्य कुर्वीत शीतद्युतिमन्दकेन्द्रम् ।।२८।।

CC-0. Nepal Sanskrit Academy, Kathmandu



स्पष्टचन्द्रसाधनम् आह ।

स्वमन्दकेन्द्राद् निजमन्दजाङ्कैर् मन्दस्फुटोऽर्को विहितो यथा प्राक् ।
स्वमन्दकेन्द्राद् निजमन्दजाङ्कैर् मन्दस्फुटोऽब्जोऽपि तथा विधेयः ॥२९॥

दत्तं चराद्यं हिमगौ पुरैव मन्दस्फुटोऽब्जो भवति स्फुटोऽतः ।

यथा पूर्वं सूर्यमन्दकेन्द्रम् उपकरणीकृत्य सूर्यमन्दफलाङ्कैर् मन्दस्पष्टः सूर्यः साधितस् तथैव चन्द्रमन्दकेन्द्रम् उपकरणीकृत्य चन्द्रमन्दफलाङ्कैर् मन्दस्पष्टश् चन्द्रः साधनीयः । चन्द्रमसि देयश् चरसंस्कारः पूर्वम् एव दत्तः । भुजफलसंस्कारोऽपि चन्द्रमसि पूर्वम् एव दत्तः । अतो मन्दस्पष्टश् चन्द्र एव स्पष्टचन्द्रो भवति ।

सूर्यस्याऽङ्केभ्यश् चन्द्रस्याऽङ्कानां साधनम् आह ।

मूलपाठः

सूर्यस्य खण्डाः शरगो ९५ विनिघ्नाः कुवेद ४१ भक्ताः शशिखण्डका वा ॥१०॥

प्रतिसंस्कृतपाठः

अङ्का रवेर् वा शरगो ९५ विनिघ्नाः कुवेद ४१ भक्ताः शशिनोऽङ्काः स्युः ॥३०॥

$$\text{चन्द्राङ्कः} = \frac{९५\ \text{सूर्याङ्कः}}{४१}$$

सूर्यचन्द्रयोः स्फुटगतिसाधनम् आह ।

मूलपाठः

खण्डान्तरे शेषतदन्तरघ्नाशां १० शोनिते विश्व १३ हृतं विधोश्चेत् ।
तद्दिग् १० लवौ कर्किमृगादिकेन्द्रे युतोनिते मध्यगतो स्फुटे स्तः ॥११॥

प्रतिसंस्कृतपाठः

सूर्यस्य स्पष्टगतिसाधनम् आह ।

स्वमन्दकेन्द्राद् मृदुनः फलस्य प्रसाधने स्याद् अवशेषकं यत् ।
यातैष्ययोः खण्डकयोर् वियुत्या निहत्य तद् व्योमकुभिर् १० भजेत ॥३१॥

यातैष्ययोर् अङ्ककयोर् वियोगाल् लब्धं फलं तत् परिशोध्य शेषम् ।
व्योमक्षमाभिर् १० विभजेत लब्धिः फलं कलाद्यं गतिजं रवेः स्यात् ॥३२॥

मृगादिकेन्द्रे क्षयसंज्ञकं स्यात् कर्कादिकेन्द्रे धनसंज्ञकं स्यात् ।
चिह्नानुसारं फलहीनयुक्ता मध्या द्युभुक्तिस् तरणेः स्फुटा स्यात् ॥३३॥

CC-0. Nepal Sanskrit Academy, Kathmandu



$$\text{सूर्यस्य कलादिकं गतिफलम्} = \frac{\text{खण्डः} - \frac{\text{शेषम्} \times \text{खण्डान्तरम्}}{१०}}{१०}$$

मकरादिकेन्द्रे गतिफलम् ऋणं स्यात् । कर्कटादिकेन्द्रे गतिफलं धनं स्यात् ।

सूर्यस्य कलादिका मध्यमा गतिः ५९।८ ऋणात्मकेन गतिफलेन वियोजनीया, धनात्मकेन गतिफलेन तु योजनीया, सूर्यस्य स्पष्टा गतिर् भवति । अत्र साधिता गतिर् दैनिकी गतिर् इति बोद्धव्या ।

चन्द्रस्य स्पष्टगतिसाधनम् आह ।

यातैष्ययोः खण्डकयोर् वियोगं शेषांशकाद्यैर् गुणितं खचन्द्रैः १० ।
भजेत लब्ध्या रहितं विदध्याद् यातैष्ययोर् अङ्ककयोर् वियोगम् ।।३४।।
शेषं निहन्याद् गुणमेदिनीभिर् १३ लब्धं वधं तं दशभिर् १० भजेत ।
गतेः फलं स्याच् शशिनः कलाद्यं स्फुटेन्दुभुक्तो रविवत् प्रसाध्या ।।३५।।

$$\text{चन्द्रस्य कलादिकं गतिफलम्} = \frac{\text{खण्डः} - \frac{\text{शेषम्} \times \text{खण्डान्तरम्}}{१०}}{१०} \times १३$$

चन्द्रस्य कलादिका मध्यमा गतिः ७९०।३५ ऋणात्मकेन गतिफलेन वियोजनीया, धनात्मकेन गतिफलेन तु योजनीया, चन्द्रस्य स्पष्टा गतिर् भवति ।

सूर्याचन्द्रमसोः सूक्ष्मगत्योः साधनम् आह ।

मूलपाठः

खगोभ्यो ९० विशुद्धो भुजः कोटिरुक्ता ततः प्रोक्तमार्गेण मान्दाः कलाः स्युः ।
रवेरष्टबाणै ५८ रवाप्तं विधोश्चेत् त्रि ३ निघ्नं त्रिभूभि १३ विभक्तं स्फुटं स्यात् ।।[५]

प्रतिसंस्कृतपाठः

भुजं विजह्याद् नवतेर् ९० लवेभ्यः कोटिर् भवेत्, पूर्ववदेव कोटेः ।
प्रसाधयेद् मन्दफलं खरांशोर् गजेषुभिर् ५८ मन्दफलं भजेत् तत् ।।३६।।
मान्दं फलं तद् रजनीश्वरस्य हत्वा गुणै ३ रामकुभिर् १३ भजेत ।
सहस्ररश्मेः शशिनः क्रमेण कलादिके भुक्तिफले भवेताम् ।।३७।।

---

५. अयं श्लोको लक्ष्मीपतिना रत्नदीपस्य टीकायां लिखितो वर्तते (प्रकाशितस्य रत्नदीपस्य प्रथमभागस्य २४२ पृष्ठम् अवलोकनीयम्) ।

CC-0. Nepal Sanskrit Academy, Kathmandu



कोटयंशाः = ९० अंशाः – भुजांशाः

सूर्यस्य मन्दकेन्द्रकोटयंशान् उपकरणीकृत्य पूर्वोक्तया (२१ श्लोकोक्तया) रीत्या मन्दफलं साधयेत् । तद् मन्दफलम् अष्टपञ्चाशता ५८ भजेत, सूर्यस्य सूक्ष्मं गतिफलं स्यात् । चन्द्रस्य मन्दकेन्द्रकोटयंशान् उपकरणीकृत्य पूर्वोक्तया रीत्या मन्दफलं साधयेत् । तद् मन्दफलं त्रिभिर् ३ गुणयित्वा त्रयोदशभिर् १३ भजेत, चन्द्रस्य सूक्ष्मं गतिफलं स्यात् । सूक्ष्मेण गतिफलेन मध्यमां गतिं पूर्ववत् संस्कुर्वीत, सूक्ष्मा गतिः स्यात् ।[६]

तिथिसाधनम् आह ।

मूलपाठः

सूर्योनचन्द्रार्क १२ लवाद् गताः स्युस्तिथ्योऽवशिष्टोनपपी १२ विलिप्ताः ।
गत्यन्तराप्ता घटिकाः स्युरेष्या वारः समाद्याढ्यगणाद्रि ७ शेषात् ॥१२॥

प्रतिसंस्कृतपाठः

चन्द्रात् सूर्यं शोधयित्वाऽवशिष्टान् भागाँश् चक्षुर्मेदिनीभिर् १२ भजेत ।
लब्धिर् याता स्यात् तिथिः शुक्लवक्त्राच् शेषांशादीन् द्वादशां १२ शेभ्य उज्झेत् ॥३८॥
भोग्यांशाद्याः स्वीयतिथ्या भवेयुर्, भास्वद्रात्रीनाथगत्योर् वियुत्या ।
लभ्यन्ते चेद् नाडिकाः षष्टि ६० रेभिर् भोग्यैर् घटयः स्युः कियत्यः कलाद्यैः ॥३९॥
त्रैराशिकेन गदितेन समागतासु नाडीषु सिध्यति निजस्य तिथेर् विरामः ।
तस्मात् स्वकीयदिवसे घटिकासु तासु प्रोक्ता तिथिर् विरमतीति विचिन्तनीयम् ॥४०॥

राश्यादिकात् स्पष्टाच् चन्द्राद् राश्यादिकं स्पष्टं सूर्यं विशोध्य शेषम् अंशादिकं कुर्यात् । तद् अंशादिकं द्वादशभिर् १२ भजेत । लब्धिमितया सङ्ख्यया सूर्यया शुक्लपक्षप्रतिपदादिका गततिथिसङ्ख्या स्यात् । शेषम् अंशादिकं द्वादशभ्यो १२ शेभ्यः परिशोध्य लब्धं शेषं कलादिकं कुर्यात् । तत् कलादिकं षष्ट्या ६० सङ्गुण्य सूर्याचन्द्रमसोः कलादिकयोर् दैनिक्योर् गत्योर् अन्तरेण भजेत, वर्तमानायास् तिथेर् भोग्यं घट्यादिकं स्यात् । अभीष्टे वारे सूर्योदयाद् भोग्यघट्यादिके व्यतीते वर्तमाना तिथिः समाप्तिं गच्छतीति बोध्यम् । अभीष्टदिनस्य वारानयनविधिः प्रतिसंस्कृते रत्नदीपेऽहर्गणानयनप्रसङ्गे (८ श्लोके) कथितः ।

वारप्रवेशकालसाधनम् आह ।

मूलपाठः

चरार्द्धदेशान्तरयोः स्वजातावैक्यं विजातौ विवरं त्वनेन ।
परिष्कृताः षष्टि ६० कला दिनेशलिप्ताः स्वदेशे गणितागमोक्ताः ॥१३॥

---

६. लक्ष्मीपतेर् इयं रीतिश् चलगणितम् अनुसरति (प्रकाशितस्य रत्नदीपस्य प्रथमभागस्य २४३–२६० पृष्ठान्यवलोकनीयानि) ।

CC-0. Nepal Sanskrit Academy, Kathmandu



प्रतिसंस्कृतपाठः

सौम्ये गोले धनाख्यं चरमुदितमथो याम्यगोले क्षयाख्यं,
प्राच्यं देशान्तरं स्वं कथितमृणमिदं पश्चिमायां न्यगादि ।
तुल्ये चिह्ने तयोः स्याद् युतिरथ वियुतिश् चिह्नभेदे तयोः स्यात्
षष्टौ ६० नाडीषु युञ्ज्याद् धनफलमधनं षष्टि ६० नाडीभ्य उज्झेत् ।।४१।।
योगे युतिः स्यात् क्षययोः स्वयोर् वा धनर्णयोर् अन्तरमेव योगः ।
बीजप्रसिद्धो विधिरेष विज्ञैर् अत्र क्रियायां स्मरणीय एव ।।४२।।
लब्धे काले वासरेशप्रवेशः सङ्ख्यावद्भिः प्रोच्यते स्वीयदेशे ।
लङ्कादेशे पद्मिनीशोदये स्यात् स्वीये देशे वासरेशप्रवेशः ।।४३।।

उत्तरे गोले चरपलानि धनात्मकानि भवन्ति । दक्षिणे गोले तानि ऋणात्मकानि भवन्ति । पूर्वाणि रेखान्तरपलानि धनात्मकानि भवन्ति । पश्चिमानि रेखान्तरपलानि ऋणात्मकानि भवन्ति । तुल्यचिह्नानां चरपलानां रेखान्तरपलानां च योगं कुर्वीत, भिन्नचिह्नानां तु तेषां वियोगं कुर्वीत । वियोगे कृतेऽधिकतराणां चिह्नं शेषे भवतीति स्मरणीयम् । योगाद् वियोगाद् वाऽऽगतानि पलानि घट्यादिकानि कुर्वीत । धनात्मकं तद् घट्यादिकं फलं षष्टौ ६० घटिकासु युञ्जीत, स्वीयदेशे वारप्रवेशकालो भवति । ऋणात्मकं तद् घट्यादिकं फलं षष्टेर्६० घटीभ्यो वियुञ्जीत, स्वीये देशे वारप्रवेशकालो भवति । लङ्कादेशे जायमानः सूर्योदयकालः स्वीये देशे वारप्रवेशकालः कथ्यते ।

नक्षत्रयोगसाधनम् आह ।

मूलपाठः

विधोः सार्कचन्द्रस्य लिप्ताः खखेभै ८०० विभक्ता गतौ स्तो भयोगौ च शेषे ।
क्रमाद्धार ८०० शुद्धे खषड् ६० घ्ने स्वगत्या जवैक्येन भक्ते तदेष्याः कलाः स्युः ।।१४।।

प्रतिसंस्कृतपाठः

नक्षत्रसाधनम् आह ।

कलादिकं शीतकरं खखेभैर् ८०० भजेत लब्धं गदितं गतं भम् ।
दास्राद् भवेच्, शेषकलादिकं तु हरात् ८०० त्यजेद् भोग्यकलादिकं स्यात् ।।४४।।
हिमांशुगत्या यदि षष्टि ६० नाड्यो लभ्यास् तदा भोग्यकलादिकेन ।
का नाडिका इत्यनुपातयुक्त्या वारे निजे स्युर् घटिकाः स्वभस्य ।।४५।।

राश्यादिकं स्पष्टं चन्द्रं कलादिकं कुर्यात् । कलादिकं चन्द्रम् अष्टशत्या ८०० भजेत । लब्धिमितया सङ्ख्यया सूच्याऽश्विन्यादिका गतनक्षत्रसङ्ख्या स्यात् । शेषं कलादिकम् अष्टशत्याः ८०० परिशोध्य लब्धं शेषं कलादिकं षष्टया ६० सङ्गुण्य चन्द्रस्य कलादिकया दैनिक्या गत्या भजेत् । वर्तमानस्य नक्षत्रस्य भोग्यं घट्यादिकं स्यात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu



योगसाधनम् आह ।

सूर्येण युक्तं शशिनं विदध्यात् कलादिकं योगफलं खखेभैः ८०० ।
भजेत लब्धिप्रमितं प्रयातं विष्कम्भतो योगमुदाहरन्ति ॥४६॥
हरात् ८०० त्यजेच् शेषकलादिकं स्याद् भोग्यं कलाद्यं, खरसैर् ६० विनिघ्नम् ।
भोग्यं कलाद्यं रविचन्द्रगत्योर् युत्या भजेत् स्युर् निजयोगघट्यः ॥४७॥

राश्यादिकयोः स्पष्टयोः सूर्याचन्द्रमसोर् योगं कुर्यात् । योगफले द्वादश १२ राशिभ्योऽधिके ततो द्वादश १२ राशीन् शोधयेत् । राश्यादिकं योगफलं कलादिकं कुर्यात् । तत् कलादिकम् अष्टशत्या ८०० भजेत । लब्धिमितया सङ्ख्यया सूच्या विष्कम्भादिका गतयोगसङ्ख्या स्यात् । शेषं कलादिकम् अष्टशत्याः ८०० परिशोध्य लब्धं शेषं कलादिकं षष्ट्या ६० सङ्गुण्य सूर्याचन्द्रमसोः कलादिकयोर् दैनिक्योर् गत्योर् योगेन भजेत । वर्तमानस्य योगस्य भोग्यं घट्यादिकं स्यात् ।

ब्रह्मवशिष्ठादिसिद्धान्तोक्तानां सूक्ष्मनक्षत्राणां स्थूलनक्षत्रेभ्यः साधनम् आह ।

मूलपाठः

अश्वादितो बाण ५ गुणा भसङ्ख्याः शैलै ७ विभक्ता ऋणलिप्तिकाः स्युः ।
तीक्ष्णोग्रवाय्वग्निजलेशभानां त्र्यंशोनशून्याग्नि (२९।४०) कला ऋणाख्याः ॥१५॥
नन्देन्दु १९ लिप्ता गजभू १८ विलिप्ताः कर्णादिषण्णां कथिता धनाख्याः ।
धनर्णयोरन्तरमन्यथैक्यं कृत्वाऽश्विभादेर्ध्रुवलिप्तिकाः स्युः ॥१६॥
विश्वान्त्यतोऽङ्केन्दु १९ कलाऽभिजित् स्याद् भमाननिघ्नाः खरसै ६० विभक्ताः ।
ताभिर्भघट्यः परिसंस्कृताः स्युः सूक्ष्मर्क्षलिप्ता व्यवहारसिद्ध्यै ॥१७॥

प्रतिसंस्कृतपाठः

दास्रादितः पञ्च ५ हता भसङ्ख्याः शैलैर् ७ हृताः स्युर् घटिकाः क्षयाख्याः ।
तीक्ष्णोग्रवाय्वग्निजलेशभानां नन्दद्वि २९ तुल्या घटिका विघट्यः ॥४८॥
खवेद ४० तुल्याः कथिता ऋणाख्या, षण्णाम् ६ उडूनां श्रवणादिकानाम् ।
नन्देन्दु १९ तुल्या घटिका विघट्यो गजेन्दु १८ तुल्याः कथिता धनाख्याः ॥४९॥
योगे युतिः स्यात् क्षययोः स्वयोर् वा धनर्णयोर् अन्तरमेव योगः ।
रीत्या ऽनया प्रोक्तदिशा क्रमेण साध्या उडूनां घटिका ध्रुवाख्याः ॥५०॥
वैश्वाग्रतःस्था नवचन्द्र १९ तुल्या घट्यो निरुक्ता अभिजिद् ध्रुवाख्याः ।
भभोगनिघ्न्यो घटिका ध्रुवाख्याः षष्ट्या ६० विभक्ताः स्फुटताम् उपेयुः ॥५१॥
पूर्वप्रसिद्धा घटिका उडूनां ध्रुवाभिधाभिः स्फुटनाडिकाभिः ।
चिह्नानुसारं रहिता युता वा सूक्ष्मर्क्षसिद्धा घटिका भवेयुः ॥५२॥

CC-0. Nepal Sanskrit Academy, Kathmandu



अश्विनीनक्षत्रं प्रथमीकृत्य स्वेष्टनक्षत्रं यावद् गणयेत् । गणने लब्धां सङ्ख्यां पञ्चभिर्५ गुणयित्वा सप्तभिर्७ भजेत, घट्यादिकम् ऋणात्मकं फलं स्यात् । भरणी-कृत्तिका-आर्द्रा-अश्लेषा-मघा-पूर्वफल्गुनी-स्वाति-ज्येष्ठा-मूल-पूर्वाषाढा-शतभिषक्-पूर्वभाद्रपदानाम् एषां द्वादश १२ नक्षत्राणाम् एकोनत्रिंशत् २९ घट्यः चत्वारिंशत् ४० पलानि ऋणाख्यानि फलानि स्युः । श्रवण-धनिष्ठा-शतभिषक्-पूर्वभाद्रपद-उत्तरभाद्रपद-रेवतीनाम् एषां षण्णां ६ नक्षत्राणाम् एकोनविंशतिर् १९ घट्योऽष्टादश १८ पलानि धनाख्यानि फलानि स्युः । इष्टनक्षत्रस्यैषां धनाख्यानाम् ऋणाख्यानां च घट्यादिकानां फलानां धनयोर् धनयोर् योगः, ऋणयोर् ऋणयोर् योगः, धनर्णयोर् अन्तरं भवतीति रीत्या संस्कारः कार्यः, इष्टनक्षत्रस्य ध्रुवः स्यात् । उत्तराषाढानक्षत्रस्याऽग्रतो वर्तमाना ऊनविंशतिर् १९ घट्योऽभिजितो नक्षत्रस्य ध्रुवो भवति । इष्टनक्षत्रस्य भभोगकालं ध्रुवाख्याभिर् घटिकाभिर् गुणयित्वा षष्ट्या ६० भजेत, स्पष्टध्रुवः स्यात् । पूर्वं प्रसिद्धाः स्ववारस्था नक्षत्राणां घटिकाः स्पष्टध्रुवघटिकाभिर् धनाख्याभिर् योजनीया ऋणाख्याभिर् वियोजनीया, स्वनक्षत्रस्य सूक्ष्मनक्षत्रसिद्धा घटिका भवेयुः ।

करणसाधनम् आह ।

मूलपाठः

गततिथिर्द्वि २ गुणा मुनि ७ शेषिता करणमग्रचदलेऽथ परे दले ।
कु १ युगथासितभूतपरार्द्धतः शकुनितः स्थिरकर्णचतुष्टयम् ।।१८।।
तिथिचयापचयार्द्धयुगूनिता गगनराम ३० कला करणप्रमा ।
गणक साधय सत्फलदं नृणां प्रतिदिनं समयाङ्गमितीरितम् ।।१९।।

प्रतिसंस्कृतपाठः

सितपक्षमुखाद् गतास् तिथीर् नयनाभ्यां २ गुणयेत् ततो भजेत् ।
अचलैर् ७ अवशेषसम्मितं करणं पूर्वदले तिथेर् भवेत् ।।५३।।
पूर्वार्धजातं करणं कु १ युक्तं तिथेर् निजायाश् चरमे दले स्यात् ।
कृष्णस्य पक्षस्य कृतेन्दु १४ तिथ्याः पाश्चात्यभागे शकुनिः प्रदिष्टः ।।५४।।
चतुष्पदाख्यं प्रथमे दले स्यात् दर्शाख्यतिथ्याश् चरमे तु नागः ।
आद्ये तिथावाद्यदले प्रदिष्टं किंस्तुघ्नसंज्ञं करणं सितस्य ।।५५।।
षष्टेर् ६० घटीभ्योऽभ्यधिका भवेयुर् ऊनाश् च घट्यस् तिथिभोगकालः ।
तदन्तरं नेत्र २ हृतं खराम ३० घटीषु युञ्जीत विवर्जयेद् वा ।।५६।।
भोगप्रमाणं करणस्य सिध्येद् वृद्धासु हीनासु घटीषु तिथ्याः ।
वाराद्यमेतत् करणावसानं, न्यगादि पञ्चाङ्गविधानमत्र ।।५७।।

शुक्लपक्षस्य प्रतिपदः स्वामीष्टायास् तिथेर् आसन्नतमां गतां तिथिं यावद् गणयित्वा समागतां सङ्ख्यां द्वाभ्यां२ गुणयित्वा गुणनफलं सप्तभिर् ७ भजेत । शेषसङ्ख्या स्वामीष्टायास् तिथेः पूर्वार्धे जायमानं करणं सूचयति । पूर्वार्धे जायमानं करणम् एक१युक्तं सत् तस्या एव तिथेर् उत्तरार्धे जायमानं करणं भवति ।

CC-0. Nepal Sanskrit Academy, Kathmandu



| | कृष्णपक्षे | | | शुक्लपक्षे | |
|---|---|---|---|---|---|
| | पूर्वार्धे | उत्तरार्धे | | पूर्वार्धे | उत्तरार्धे |
| चतुर्दश्याः | | शकुनिः | | | |
| अमावास्यायाः | चतुष्पात् | नागः | प्रतिपदः | किंस्तुघ्नः | |

स्वाभीष्टायास् तिथेर् भोगकालात्मकस्य घट्यादिकस्य षष्टेर् ६० घटिकानां चाऽन्तरं कुर्वीत । शेषं द्वाभ्यां २ विभज्य फलम् आनयेत् । षष्टेर् ६० घटीभ्यः स्वतिथ्या भोगकालस्याऽधिकत्वे तत् फलं त्रिंशति ३० घटीषु युञ्जीत, करणभोगकालः स्यात् । षष्टेर् ६० घटीभ्यः स्वतिथ्या भोगकालस्य न्यूनत्वे तत् फलं त्रिंशतो ३० घटीभ्यः वियुञ्जीत, करणभोगकालः स्यात् । तिथिर् वारो नक्षत्रं योगः करणं चैतानि पञ्च कालस्याऽङ्गतया पञ्चाङ्गतया गृह्यन्ते ।

सूक्ष्मतमस्य तिथ्यन्तकालस्य साधनम् आह ।

मूलपाठः

तत्कालजार्केन्दुत एव तेषां स्फुटत्वमस्मादधिकेऽल्पके वा ।
ततोऽसकृत् साधनतः स्फुटत्वं कार्यं त्वदृष्टागमहेतुविद्भिः ॥२०॥

प्रतिसंस्कृतपाठः

प्रातःकाले साधिताभ्यां स्फुटाभ्यां सूर्येन्दुभ्यां साधिते स्वीयतिथ्याः ।
अन्ते काले मध्यमौ पुष्पवन्तौ कृत्वा भूयः प्रस्फुटौ तौ विधेयौ ॥५८॥
सूर्येन्दुभ्यां प्रस्फुटाभ्याम् अमूभ्यां भूयः साध्यः स्वीयतिथ्या विरामः ।
तस्मिन् काले मध्यमौ तौ स्फुटौ च कृत्वा भूयः साधयेत् ता घटीश् च ॥५९॥
एवं रीत्या चाऽसकृत् साध्यमानः सिद्ध्येत् स्थास्नुः स्पष्टतिथ्यन्तकालः ।
ग्रासे साध्ये चन्द्रमस्तीक्ष्णभान्वोर् एतां रीतिं पण्डिताः संस्मरन्ति ॥६०॥

रत्नदीपे सूर्योदयकाले ग्रहाः साधिताः सन्ति । प्रातःकाले साधिताभ्यां स्फुटाभ्यां सूर्याचन्द्रमोभ्यां पूर्वम् अभीष्टायास् तिथेर् अवसानकालं साधयेत । एवं साधिते स्वतिथ्या अवसानकाले मध्यमौ सूर्याचन्द्रमसौ प्रसाध्य तौ स्फुटीकुर्यात् । ताभ्यां स्फुटाभ्यां रविचन्द्राभ्यां पुनः स्वतिथ्या विरामकालं साधयेत् । एवम् असकृत् कुर्याद् यावद् अविशेषः । एवम् असकृत्कर्मणा साधितस् तिथ्यन्तकालः सूक्ष्मतां गच्छति । पूर्णिमाया विरामकालं प्रसाध्यैव चन्द्रग्रहणस्य क्रियां कर्तुं गणकाः प्रभवन्ति । एवम् अमावास्याया अवसानकालसाधनानन्तरं सूर्यग्रहणगणनाप्रक्रिया प्रसरति । अतो ग्रहणगणनाप्रसङ्गे सूक्ष्मतमस्य तिथ्यन्तकालस्य साधनम् अपेक्षितं भवति ।

अस्याऽधिकारस्योपसंहारम् आह ।

दैवज्ञलक्ष्मीपतिना कृतस्य सिद्धान्तसारस्य लघुक्रियस्य ।
पञ्चाङ्गपत्रीगणनाधिकारः सुबोधहेतोः प्रतिसंस्कृतोऽभूत् ॥६१॥

इति दैवज्ञशिरोमणिना लक्ष्मीपतिशर्मणा विरचितस्य सिद्धान्तसारस्य रत्नदीपस्य प्रतिसंस्कृते रूपे पञ्चाङ्गाधिकारः ।

□

CC-0. Nepal Sanskrit Academy, Kathmandu

# अथ भौमादिताराग्रहाणां स्पष्टाधिकारः

अहर्गणाद् मङ्गलस्य साधनम् आह ।

मूलपाठः

शिव ११ घ्नघस्रैकयमां २१ शकोऽह्नः शून्येभ ८० भागैः सकलः कुजः स्यात् ।

प्रतिसंस्कृतपाठः

रुद्र ११ घ्नो घस्रसङ्घः शशिनयन २१ हृतः स्याल् लवादिर्, दिनौघोऽ
शीत्या ८० प्तः स्यात् कलादिः, फलयुगलयुतिर् जायते भूमिपुत्रः ।

अहर्गणोत्पन्नो मङ्गलः $= \left(\frac{११ अ}{२१}\right)$ अंशादिः $+ \left(\frac{अ}{८०}\right)$ कलादिः ।[1]

अहर्गणाद् बुधशीघ्रोच्चस्य साधनम् आह ।

मूलपाठः

शराब्धि ४५ निघ्नद्युगणेश ११ भक्तो दिनेश ११ भागैः सकलो बुधोच्चम् ॥१॥

---

१. अहर्गणाद् भौमस्य साधने भास्करस्य सूत्रम्–

रुद्रघ्नो द्युचयो द्विधा शशियमै २१ र्वेदाब्धिसिद्धेषुभि ५२४४४
र्भक्तोंऽशादिफलद्वयं च सहितं स्याद् मेदिनीनन्दनः ॥१०॥

(करणकुतूहले मध्यमाधिकारे)

अतो भास्करस्य सूत्रानुसारम्–

अहर्गणोत्पन्नो भौमः $= \frac{११ अ}{२१}$ (अंशादिः) $+ \frac{११ अ}{५२४४४}$ (अंशादिः)

$= \frac{११ अ}{२१}$ (अंशादिः) $+ \frac{११ \times ६० अ}{५२४४४}$ (कलादिः)

$= \frac{११ अ}{२१}$ (अंशादिः) $+ \frac{१६५ अ}{१३१११}$ (कलादिः)

$= \frac{११ अ}{२१}$ (अंशादिः) $+ \frac{अ}{७९\frac{७६}{१६५}}$ (कलादिः)

अतो लक्ष्मीपतिना भास्करस्यैव सूत्रस्य स्वल्पान्तरत्वेन किञ्चिद् रूपान्तरं कृतम् इति स्फुटम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu



प्रतिसंस्कृतपाठः

बाणाब्धि ४५ घ्नो दिनौघो विधुधरणि ११ हृतः स्याल् लवादिर्, दिनौघो रुद्रा११ प्तः स्यात् कलादिः, फलयुगलयुतिः स्याद् बुधस्या ऽशुतुङ्गम् ॥१॥

अहर्गणोत्पन्नं बुधशीघ्रोच्चम् $= \left(\frac{४५\,अ}{११}\right)$ अंशादि $+ \left(\frac{अ}{११}\right)$ कलादि

अहर्गणाद् बृहस्पतेः साधनम् आह ।

मूलपाठः

गणार्क १२ भागो द्युखखाश्विवेदां ४२०० शोनो गुरुः स्याद्

प्रतिसंस्कृतपाठः

दिनगणोऽर्क १२ हृतो लवपूर्वकः, खखभुजाब्धि ४२०० हृतो दिनसञ्चयः । लवमुखः, फलयोर् अनयोर् भवेद् वियुतिसंमित इन्द्रपुरोहितः ॥२॥

अहर्गणोत्पन्नो बृहस्पतिः $= \left(\frac{अ}{१२}\right)$ अंशादिः $- \left(\frac{अ}{४२००}\right)$ अंशादिः[२]

अहर्गणाच् शुक्रशीघ्रोच्चस्य साधनम् आह ।

मूलपाठः

अथ शुक्रशीघ्रम् ।

दिनाष्ट ८ निघ्नाच्छर ५ भक्तलब्धं दिनाभ्रतर्काब्धि ४६० लवाभ्युपेतम् ॥२॥

---

२. अहर्गणाद् बृहस्पतेः साधने गणेशदैवज्ञस्य सूत्रम्–

द्युपिण्डोऽर्क १२ भक्तो लवाद्यो गुरुः स्यात् ।
द्युपिण्डात् खशैला ७० प्तलिप्ताविहीनः ॥१३॥

(ग्रहलाघवे मध्यमाधिकारे)

अतो गणेशदैवज्ञस्य सूत्रानुसारम्–

अहर्गणोत्पन्नो बृहस्पतिः $= \left(\frac{अ}{१२}\right)$ अंशादिः $- \left(\frac{अ}{७०}\right)$ कलादिः

$= \left(\frac{अ}{१२}\right)$ अंशादिः $- \left(\frac{अ}{७० \times ६०}\right)$ अंशादिः

$= \left(\frac{अ}{१२}\right)$ अंशादिः $- \left(\frac{अ}{४२००}\right)$ अंशादिः

अतो लक्ष्मीपतिना गणेशदैवज्ञस्य सूत्रस्य किञ्चिद् रूपान्तरं कृतम् इति स्फुटम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu



प्रतिसंस्कृतपाठः

नागैर् ८ निघ्नो घस्रसङ्घोऽक्ष ५ भक्तो भागादिः स्याद्, व्योमषड्वेद ४६० भक्तः ।
घस्रस्तोमोंऽशादिरेतद्द्वयस्य योगः सिध्येद् भार्गवस्याऽशुतुङ्गम् ॥३॥

अहर्गणोत्पन्नं शुक्रशीघ्रोच्चम् = $\left(\frac{८ अ}{५}\right)$ अंशादि + $\left(\frac{अ}{४६०}\right)$ अंशादि

अहर्गणाच् शनैश्चरस्य साधनम् आह ।

मूलपाठः

अहर्गणः सप्त ७ गुणो नवाभ्रपक्षै २०९ र्विभक्तोऽरुणपुत्रमध्यः ।

प्रतिसंस्कृतपाठः

दिनगणो नग ७ सङ्गुणितो हृतो नवनभोनयनैर् २०९ लवपूर्वकः ।
भवति भास्करसूनुरहर्गणाल् लवमुखाः खचरा इह साधिताः ॥४॥

अहर्गणोत्पन्नः शनैश्चरः = $\left(\frac{७ अ}{२०९}\right)$ अंशादिः

मध्यमानां ग्रहाणां साधनम् आह ।

मूलपाठः

दिनोद्भवास्ते गगनेचरांशा मध्या भवेयुर्ध्रुवकाभ्युपेताः ॥३॥

प्रतिसंस्कृतपाठः

एते खेटा घस्रसङ्घप्रजाताः संयोक्तव्याः स्वैर् ध्रुवैर् उद्गमस्थैः ।
मध्याः खेटा अंशकादिस्वरूपा इष्टे घस्रे भास्करस्योदये स्युः ॥५॥

मध्यमो ग्रहः = अहर्गणोत्पन्नो ग्रहः + ग्रहध्रुवः

मध्यमः सूर्यो मध्यमाभ्यां बुधशुक्राभ्यां समानो भवति तथा मङ्गलबृहस्पतिशनैश्चराणां शीघ्रोच्चैश् च समानो भवतीत्याह ।

मूलपाठः

तुङ्गं भवेज्जीवकुजार्कजानां ज्ञशुक्रयोर्मध्यम एव भास्वान् ।

प्रतिसंस्कृतपाठः

मध्यमाः कुजबृहस्पतिमन्दा आसतेऽत्र गणिता, बुधशुक्रौ ।
मध्यमौ कमलिनीदयितेन मध्यमेन समतां विदधाते ॥६॥

CC-0. Nepal Sanskrit Academy, Kathmandu



मध्यमस् तरणिरेव चलोच्चं जायते क्षितिजजीवशनीनाम् ।
यामिनीशतनयस्य कवेश् च शीघ्रतुङ्गमिह साधितमास्ते ।।७।।

मध्यमः सूर्यः = मध्यमो बुधः = मध्यमः शुक्रः = मङ्गलस्य शीघ्रोच्चम् = गुरोः शीघ्रोच्चम् = शनेः शीघ्रोच्चम्

शीघ्रफलसाधनार्थं शीघ्रकेन्द्रसाधनम् आह ।

मूलपाठः

ग्रहोनतुङ्गं किल शीघ्रकेन्द्रं भार्द्धा १८० धिकं तद् यदि चक्र ३६० शुद्धम् ।।४।।
खबाणचन्द्रा १५० भ्यधिकं त्रि ३ निघ्नं तद्युक् तदंशांश ३० वशात्

प्रतिसंस्कृतपाठः

शीघ्रात् तुङ्गाद् मध्यखेटो विशोध्यः शीघ्रं केन्द्रं तस्य खेटस्य सिध्येत् ।
षड्भ्यो ६ राशिभ्योऽधिके शीघ्रकेन्द्रे राशिभ्यस् तच् शोधयेद् द्वादशभ्यः १२ ।।८।।
द्राक्केन्द्रांशाः खेषुचन्द्रा १५० धिकाश् चेच् शेषांशास् ते वह्नि ३ निघ्ना विधेयाः ।

शीघ्रोच्चाद् मध्यमं ग्रहं त्यजेच् शीघ्रकेन्द्रं स्यात् । शीघ्रकेन्द्रं षड्भ्यो ६ राशिभ्योऽधिकतरं चेद् भवेत् तर्हि तच् शीघ्रकेन्द्रं द्वादशभ्यो१२ राशिभ्यो जह्यात् । षड्भ्यो ६ राशिभ्योऽधिकतरं शीघ्रकेन्द्रम् अत्र प्रक्रियायां नोपयुज्यत इति स्मरणीयम् । अत्र प्रत्येकं पञ्चताराग्रहाणां शीघ्रकेन्द्रेभ्यः शीघ्रफलाङ्काः साधयित्वा दर्शिताः । प्रथमे, द्वितीये, तृतीये, चतुर्थे, पञ्चमे च राशौ शीघ्रकेन्द्रे सति प्रतिराशि शीघ्रफलाङ्काः साधिताः । शीघ्रकेन्द्रे षष्ठे राशौ सति दशभिर् दशभिर् अंशैः शीघ्रफलाङ्काः साधिताः ।

शीघ्राङ्कानाम् उपक्रमम् आह ।

मूलपाठः

क्रमेण ।
भौमादिकानां चलखण्डभागाः प्रोक्ताः सुखेन ग्रहसिद्धिलब्ध्यै ।।५।।

प्रतिसंस्कृतपाठः

भौमादीनां शीघ्रसंज्ञान् फलाङ्काँस् तेषां सिद्ध्यै वक्तुमभ्युद्यतोऽस्मि ।।६।।

भौमस्य शीघ्राङ्कान् आह ।

मूलपाठः

भौमस्य खागा ७० गजरामचन्द्राः १३८ सप्ताङ्कचन्द्रा १९७ नगरामपक्षाः २३७ ।
नन्देन्दुपक्षा २१९ नवशैलचन्द्रा १७९ बाणाभ्रचन्द्राः १०५ स्युरिमे क्रमेण ।।६।।

CC-0. Nepal Sanskrit Academy, Kathmandu



प्रतिसंस्कृतपाठः

भौमस्य खागा ७० गजरामचन्द्राः १३८
सप्ताङ्कचन्द्रा १९७ नगरामपक्षाः २३७ ।
नन्देन्दुपक्षा २१९ नवशैलचन्द्रा १७९
बाणाभ्रचन्द्राः १०५ कथिताश् चलाङ्काः ॥१०॥

## भौमस्य

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| शीघ्रकेन्द्रांशाः | ० | ३० | ६० | ९० | १२० | १५० | १६० | १७० | १८० |
| शीघ्राङ्काः | ० | ७० | १३८ | १९७ | २३७ | २१९ | १७९ | १०५ | ० |
| शीघ्राङ्कान्तराणि | | ७० | ६८ | ५९ | ४० | -१८ | -४० | -७४ | -१०५ |

बुधस्य शीघ्राङ्कान् आह ।

मूलपाठः

ज्ञस्येभवेदाः ४८ खखगाः ९० खसूर्या १२०
भेलाः १२७ कुनन्दा ९१ स्त्रिरसाः ६३ सुराः ३३ स्युः ।

प्रतिसंस्कृतपाठः

बुधस्य नागश्रुतयः ४८ खनन्दाः ९० शून्यद्विचन्द्रा १२० नगबाहुचन्द्राः १२७ ।
शशाङ्कनन्दास् ९१ त्रिरसास् ६३ त्रिरामा ३३ विज्ञैश् चलाङ्काः क्रमशः प्रदिष्टाः ॥११॥

## बुधस्य

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| शीघ्रकेन्द्रांशाः | ० | ३० | ६० | ९० | १२० | १५० | १६० | १७० | १८० |
| शीघ्राङ्काः | ० | ४८ | ९० | १२० | १२७ | ९१ | ६३ | ३३ | ० |
| शीघ्राङ्कान्तराणि | | ४८ | ४२ | ३० | ७ | -१६ | -२८ | -३० | -३३ |

बृहस्पतेः शीघ्राङ्कान् आह ।

मूलपाठः

गुरोः खरामा ३० युगपञ्च ५४ नागा-
ङ्गानी ६८ षुतर्काः ६५ कुयुगा ४१ भ २७ मिन्द्राः १४ ॥७॥

CC-0. Nepal Sanskrit Academy, Kathmandu



प्रतिसंस्कृतपाठः

बृहस्पतेः शून्यगुणाः ३० समुद्रबाणा ५४ गजाङ्गानि ६८ पृषत्कतर्काः ६५ ।
शशाङ्कवेदा ४१ नगलोचनानि २७ समुद्रचन्द्रा १४ गदिताश् चलाङ्काः ।।१२।।

बृहस्पतेः

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| शीघ्रकेन्द्रांशाः | ० | ३० | ६० | ९० | १२० | १५० | १६० | १७० | १८० |
| शीघ्राङ्काः | ० | ३० | ५४ | ६८ | ६५ | ४१ | २७ | १४ | ० |
| शीघ्राङ्कान्तराणि | ३० | २४ | १४ | −३ | −२४ | −१४ | −१३ | −१४ | |

शुक्रस्य शीघ्राङ्कान् आह ।

मूलपाठः

भृगोः शरागा ७५ गजवेदचन्द्रा १४८ स्तिथ्यश्विनो २१५ गाङ्गयमाः २६७ क्रमात् स्युः ।
पञ्चाङ्गपक्षा २६५ यमचन्द्रपक्षा २१२ रामोदधीला १४३ गणितागमोत्थाः ।।८।।

प्रतिसंस्कृतपाठः

भृगोः शरागा ७५ गजवेदचन्द्राः १४८ पञ्चेन्दुपक्षा २१५ गिरिशत्रुपक्षाः २६७ ।
पञ्चाङ्गपक्षा २६५ यमचन्द्रपक्षास् २१२ त्रिवेदचन्द्रा १४३ गदिताश् चलाङ्काः ।।१३।।

शुक्रस्य

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| शीघ्रकेन्द्रांशाः | ० | ३० | ६० | ९० | १२० | १५० | १६० | १७० | १८० |
| शीघ्राङ्काः | ० | ७५ | १४८ | २१५ | २६७ | २६५ | २१२ | १४३ | ० |
| शीघ्राङ्कान्तराणि | ७५ | ७३ | ६७ | ५२ | −२ | −५३ | −६९ | −१४३ | |

शनेश्चरस्य शीघ्राङ्कान् आह ।

मूलपाठः

घना १७ रदा ३२ नागगुणाः ३८ शनेः स्युर्बाणाग्नयो ३५ भानि २७ दिनानि १५ सप्त ७ ।

प्रतिसंस्कृतपाठः

मन्दस्य सप्तक्षितयो १७ द्विरामा ३२ भुजङ्गरामा ३८ विषयाश्रयाशाः ३५ ।
महीध्रनेत्राणि २७ पृषत्कचन्द्रा १५ नगाः ७ प्रदिष्टाः क्रमशश् चलाङ्काः ।।१४।।

CC-0. Nepal Sanskrit Academy, Kathmandu



## शनैश्चरस्य

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| शीघ्रकेन्द्रांशाः | ० | ३० | ६० | ९० | १२० | १५० | १६० | १७० | १८० |
| शीघ्राङ्काः | ० | १७ | ३२ | ३८ | ३५ | २७ | १५ | ७ | ० |
| शीघ्राङ्कान्तराणि | १७ | १५ | ६ | -३ | -८ | -१२ | -८ | -७ | |

शीघ्राङ्कानां परिचयम् आह ।

राशौ ३०राशौ ३० शीघ्रजाङ्काः प्रदिष्टा दिग्भिर् १० दिग्भिर् १०भागकैः षष्ठराशौ ।
शून्ये० राशौ षड्६मिते चैव राशौ सर्वेषां खं० शीघ्रजाङ्को न्यगादि ।।१५।।

शीघ्रकेन्द्राच् शीघ्राङ्कसाधनम् आह ।

मूलपाठः

एष्यान्तरघ्नोर्वरितांश ३० भागान्वितोनितास्ते स्फुटशीघ्रजाङ्काः ।।९।।
भवन्ति ते तर्क ६ हृताश्चलांशाः

प्रतिसंस्कृतपाठः

द्राक्केन्द्रोत्था अंशकाः शून्यरामैर् ३० भाज्या, अङ्का लब्धितुल्या गताः स्युः ।
शेषांशाद्यं गम्ययातान्तरेण हृत्वा भागैः शून्यरामैर् ३० भजेत ।।१६।।
द्राक्केन्द्रांशाः खेषुचन्द्रा १५० धिकाश् चेद् दिग्भिर् १० भागैस् तत्र कार्योऽनुपातः ।
लब्धांशादीन् यातशीघ्राङ्ककेषु दद्याज् जह्याद् वृद्धिहान्योः क्रमेण ।।१७।।
शैघ्रान् अङ्कान् अत्र लब्धान् भजेत षड्भिः ६ शैघ्रं स्यात् फलं भागपूर्वम् ।

शीघ्रकेन्द्रांशान् त्रिंशता ३० भजेत । लब्धितुल्या सङ्ख्या गतान् शीघ्रफलाङ्कान् सूचयति । त्रिंशद्३०भक्तशेषं गतगम्यानां शीघ्रफलाङ्कानाम् अन्तरेण (खण्डेन) सङ्गुण्य त्रिंशता३० भजेत । शीघ्रफलाङ्का वर्धमानाश् चेत् तत् फलं गतेषु शीघ्रफलाङ्केषु युञ्जीत । शीघ्रफलाङ्काः क्षीयमाणाश् चेत् तत् फलं गतेभ्यः शीघ्रफलाङ्केभ्यः शोधयेत् । अभीष्टाः शीघ्रफलाङ्का भवन्ति । शीघ्रकेन्द्रांशाः सार्धशताद् १५० अंशेभ्योऽधिकाश् चेद् भवेयुस् तर्हि सारण्यां दशानां१० दशानां१० भागानाम् अन्तरेण शीघ्रफलाङ्का निर्दिष्टाः सन्ति । अतस् तत्र दशभिर्१० अंशैर् अनुपातः कार्यो भवति । तत्राऽपि सामान्यनियमानुसारं त्रिंशतां३० शैर् अनुपातः क्रियेत चेत् ते शेषांशास् त्रिभिर् ३ गुणनीया भवन्ति । अनया रीत्या समुपलब्धान् शीघ्रफलाङ्कान् षड्भिर् ६ भजेत, अंशादिकं शीघ्रफलं सिद्ध्यति ।

प्राग्द्राग्ग्रहस्य मन्दस्पष्टग्रहस्य स्पष्टग्रहस्य च साधनम् आह ।

मूलपाठः

तदर्द्धयुक्तोनितमध्यखेटः ।
प्राग्द्राग्ग्रहो मन्दखगः समग्रैश्चलांशकैर्युग् रहितः स्फुटः स्यात् ।।१०।।

CC-0. Nepal Sanskrit Academy, Kathmandu



प्रतिसंस्कृतपाठः

प्राग्द्राग्ग्रहस्य साधनम् आह ।

मेषादिस्थे शीघ्रकेन्द्रे फलं स्वं जूकादिस्थे तत् फलं स्याद् ऋणाख्यम् ।।१८।।
अर्धेनाऽस्याः संस्कृतेर् मध्यखेटः संस्कार्यः प्राग्द्राग्ग्रहः स्यात् प्रसिद्धः ।

मेषादिके शीघ्रकेन्द्रे शीघ्रफलं धनं भवति । तुलादिके शीघ्रकेन्द्रे शीघ्रफलम् ऋणं भवति । इदानीं साधितस्य शीघ्रफलस्याऽर्धेन मध्यमग्रहश् चिह्नानुसारं संस्कार्यः प्राग्द्राग्ग्रहो भवति ।

मन्दफलानयनार्थं प्राग्द्राग्ग्रहः प्रसाध्य इत्याह ।

एतस्मात् प्राग्द्राग्ग्रहाद् वक्ष्यमाणः संस्कारः स्याद् मन्दनाम्ना प्रसिद्धः ।।१९।।

प्राग्द्राग्ग्रहं प्रसाध्यैव मन्दफलसंस्कारः साधनीयो भवति ।

मन्दफलसाधनार्थं स्थिरमन्दोच्चांशान् मन्दकेन्द्रसाधनं चाऽह ।

मूलपाठः

द्विरामचन्द्रैः १३२ शरपक्षदस्त्रैः २२५ यमाद्रिचन्द्रैः १७२ कुगजै ८१ र्मृदूच्चैः ।
नागाग्निदस्त्रैः २३८ कुसुताद् विशुद्धाः प्राग्द्राग्ग्रहाः स्युर्मृदुकेन्द्रकाणि ।।११।।

प्रतिसंस्कृतपाठः

द्विरामचन्द्राः १३२ शरपक्षदस्त्रा २२५ यमाद्रिचन्द्रा १७२ धरणीभुजङ्गाः ८१ ।
नागाग्निदस्त्रा २३८ मृदुतुङ्गभागाः स्थिरा निरुक्ताः क्षितिजादिकानाम् ।।२०।।

| | मङ्गलस्य | बुधस्य | बृहस्पतेः | शुक्रस्य | शनेः |
|---|---|---|---|---|---|
| स्थिरा मन्दोच्चांशाः | १३२ | २२५ | १७२ | ८१ | २३८ |

मन्दकेन्द्रस्य साधनं मन्दफलस्य धनर्णत्वं चाऽह ।

प्राग्द्राग्खेटो मन्दतुङ्गाद् विशोध्यो मान्दं केन्द्रं तस्य खेटस्य सिद्ध्येत् ।
मान्दे केन्द्रे मेषषट्के धनाख्यः संस्कारः स्याज् जूकषट्के क्षयाख्यः ।।२१।।

प्राग्द्राग्ग्रहं मन्दोच्चाच् शोधयेद् मन्दकेन्द्रं स्यात् । मेषादिकेन्द्रे मन्दफलं धनं भवति । तुलादिकेन्द्रे तु मन्दफलम् ऋणं भवति ।

CC-0. Nepal Sanskrit Academy, Kathmandu



मन्दफलसाधनम् आह ।

मूलपाठः

मान्दं केन्द्रं भार्द्धं १८० भागाधिकं चेच्
छुद्धं चक्रात् ३६० तत् खरामां ३० शकैः स्युः ।
खेला १० शैलेला १७ नखाः २० कुञ्जरेला १८
भीमा ११ भोग्यान्तर्हृतात् खाग्नि ३० भागैः ॥१२॥
युक्तोनास्ते वेदरामै ३४ र्गुणैकै १३ र्बाणेलाभिः १५ पञ्चभि ५ स्त्र्यश्विभि २३ र्घ्नाः ।
भौमादीनां षष्टि ६० हृन् मन्दभागा मध्यस्तत्संस्कारितो मन्दखेटः ॥१३॥

प्रतिसंस्कृतपाठः

मान्दाङ्कांस् तेषां परिचयं चाऽह ।

आकाशक्ष्मा १० गिरिशशधराः १७ शून्यनेत्राणि २० सर्प-
पृथ्व्यो १८ रुद्राः ११ प्रतिगृहभवा अंशरूपाः समेषाम् ।
मान्दा अङ्का इह निगदिताः पञ्चतारग्रहाणाम्
आदौ तेभ्यो गदितविधिना संस्कृतिः साधनीया ॥२२॥
शून्ये ० षड्भी ६ राशिभिः संमिते वा मान्दाङ्कः खं ० जायते मन्दकेन्द्रे ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| मन्दकेन्द्रांशाः | ० | ३० | ६० | ९० | १२० | १५० | १८० |
| मान्दाङ्काः | ० | १० | १७ | २० | १८ | ११ | ० |
| मान्दाङ्कान्तराणि | १० | ७ | ३ | -२ | -७ | -११ | ० |

मन्दफलसाधनम् आह ।

षड्भ्यो ६ राशिभ्योऽधिके मन्दकेन्द्रे राशिभ्यस् तद् द्वादशभ्यः १२ समुज्झेत् ॥२३॥
अङ्का ग्राह्या मन्दकेन्द्रोत्थराशिलभ्याः शेषं गम्ययातान्तरेण ।
हत्वा भक्त्वा त्रिंशता ३० योजनीयं हेयं पूर्वे वृद्धिहानिक्रमेण ॥२४॥

मान्द्रं केन्द्रं षड्भ्यो ६ राशिभ्योऽधिकतरं चेत् तद् द्वादशभ्यो १२ राशिभ्यः शोधनीयम् । षड्भ्यो ६ राशिभ्योऽधिकतरं मन्दकेन्द्रं सारणीम् उपकरणीकृत्य मन्दफलसाधने नोपयुज्यत इति चिन्तनीयम् । मन्दकेन्द्रांशान् त्रिंशता ३० भजेत । लब्धिसङ्ख्या गतान् मन्दफलाङ्कान् सूचयति । त्रिंशद् ३० भक्तशेषम् अंशादिकं यातेष्याणां मन्दफलाङ्कानाम् अन्तरेण (खण्डेन) सङ्गुण्य त्रिंशता ३० विभज्य फलम् आनयेत् । मन्दफलाङ्का वर्धमानाश् चेत् तत् फलं यातेषु मन्दफलाङ्केषु युञ्जीत, मन्दफलाङ्काः क्षीयमाणाश् चेत् तत् फलं यातेभ्यो मन्दफलाङ्केभ्यः शोधयेद्, अभीष्टा मान्दफलाङ्का भवेयुः । भौमादीनां पञ्चानाम् अपि ताराग्रहाणां मन्दफलसाधन इयं सामान्या रीतिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu



प्रत्येकं ग्रहाणां मन्दफलानां साधनम् आह ।

सा संस्कृतिर् वेदगुणैस् ३४ त्रिभूभिर् १३ बाणेन्दुभिः १५ पञ्चभि ५ रग्निदोर्भिः २३ ।
क्रमेण हत्वा खरसैर् ६० भजेत मान्दं फलं स्यात् क्षितिजादिकानाम् ॥२५॥

पूर्वागतस्य मन्दफलस्य गुणका भाजकाश् च

| | मङ्गलस्य | बुधस्य | बृहस्पतेः | शुक्रस्य | शनेः |
|---|---|---|---|---|---|
| गुणकः | ३४ | १३ | १५ | ५ | २३ |
| भाजकः | ६० | ६० | ६० | ६० | ६० |

एवं समागतान् मन्दफलाङ्कान् स्वेन गुणकेन गुणयित्वा षष्ट्या ६० भजेत्, प्रत्येकं पञ्चताराग्रहाणाम् अंशाद्विकं मन्दफलं सिद्ध्येत् ।

मन्दस्पष्टग्रहस्य साधनम् आह ।

मृदुसंज्ञफलेन मध्यमः खचरः संस्करणीय उक्तवत् ।
भवति द्युचरो मृदुस्फुटश्

एवं प्रसाधितं मन्दफलम् अविकलम् एव चिह्नानुसारं मध्यमे ग्रहे संस्कुर्वीत, मन्दस्पष्टो ग्रहो भवति ।

द्वितीयस्य शीघ्रकेन्द्रस्य साधनम् आह ।

चलतुङ्गाद् अथ तं निजात् त्यजेत् ॥२६॥
मन्दस्पष्टे खेचरे शीघ्रतुङ्गाच् शुद्धे केन्द्रं स्याद् द्वितीयं चलाख्यम् ।

ग्रहस्य शीघ्रोच्चाद् मन्दस्पष्टं ग्रहं त्यजेद्, द्वितीयं शीघ्रकेन्द्रं प्रजायते ।

स्पष्टग्रहस्य साधनम् आह ।

द्वैतीयीकाच् शीघ्रकेन्द्रात् पुरावत् संस्कारोऽन्यः शीघ्रसंज्ञः प्रसाध्यः ॥२७॥
मन्दस्पष्टे खेचरे सर्वमेव द्वैतीयीकं शीघ्रसंज्ञं फलं तत् ।
दद्यात् स्पष्टः खेचरः स्याद्

द्वितीयाच् शीघ्रकेन्द्राच् शीघ्रफलं साधनीयं, तत् फलं द्वितीयं शीघ्रफलम् इति कथ्यते । अविकलम् एव द्वितीयं शीघ्रफलं मन्दस्पष्टग्रहे संस्कुर्वीत स्पष्टग्रहः स्यात् ।

वक्ष्यमाणेषु कार्येषु शीघ्रकेन्द्रपदेन द्वितीयं शीघ्रकेन्द्रम् एव ग्राह्यम् इत्याह ।

द्वितीयाच् शीघ्रात् केन्द्राद् भावि कार्यं विधेयम् ॥२८॥

CC-0. Nepal Sanskrit Academy, Kathmandu



मन्दस्फुटगतिसाधनम् आह ।

मूलपाठः

अर्द्धा $\frac{१}{२}$ र्द्धा $\frac{१}{२}$ भ्रार्का शं $\frac{१२०}{२}$ पञ्चांश $\frac{५}{२}$ षष्टयंशै $\frac{६०}{२}$ र्मान्दाङ्कान्तःफलैर्हीनयुक्ता ।
भौमान् मध्या मन्दजा

प्रतिसंस्कृतपाठः

यातैष्ययोर् अङ्कयोर् वियोगो मान्दाख्ययोर् भूमिसुतादिकानाम् ।
द्वाभ्यां २ भुजाभ्यां २ गगनाक्षिचन्द्रैः १२० शरैः ५ खतर्कैः ६० क्रमशो विभक्तः ॥२९॥
मान्दाभिधानं गतिजं फलं स्याद् धनर्णकं कर्किमृगादिकेन्द्रे ।
तत्संस्कृता मध्यगतिर् गतिः स्याद् मन्दस्फुटाख्या क्षितिजादिकानाम् ॥३०॥

भौमस्य मन्दफलसाधने गतगम्ययोर् मान्दाङ्कयोर् अन्तरं द्वाभ्यां २ भजेत । लब्धिर् मन्दगतिफलं भवति । कर्कादिके मन्दकेन्द्रे तद् मन्दगतिफलं धनात्मकं भवति । मकरादिके मन्दकेन्द्रे तु तद् मन्दगतिफलम् ऋणात्मकं भवति । भौमस्य मध्यमायां गतौ तद् मन्दगतिफलं चिह्नानुसारं संस्कुर्वीत, भौमस्य मन्दस्पष्टा गतिर् भवति ।

बुधस्य मन्दफलसाधने गतगम्ययोर् मान्दाङ्कयोर् अन्तरं द्वाभ्यां २ विभज्य तस्य मन्दगतिफलम् आनयेत् । एवं बृहस्पतेर् मान्दाङ्कयोर् अन्तरं विंशत्यधिकशतेन १२० विभज्य, शुक्रस्य पञ्चभिर् ५ विभज्य, शनैश्चरस्य च षष्टया ६० विभज्य मन्दगतिफलं साधयेत् । मन्दगतिफलं मध्यगतौ संस्कृत्य कथितवद् मन्दस्पष्टां गतिं साधयेत् ।

स्पष्टगतिसाधनम् आह ।

मूलपाठः

मन्दहीना तुङ्गा केन्द्रा स्याद् गतिः शास्त्ररीत्या ॥१४॥
खण्डान्तरं शेषतदन्तरघ्नाऽभ्रत्र्यंश ३० हीनान्वितमेव तेन ।
केन्द्रा हता शून्यगजेन्दु १८० भक्तैर्युतोनिता मन्दगतिः स्फुटा स्यात् ॥१५॥

प्रतिसंस्कृतपाठः

त्यजेद् मृदुस्पष्टगतिं चलोच्चगतेर् भवेत् केन्द्रभवा गतिश् च ।
अनेन केन्द्रस्य जवेन साध्यं शीघ्राभिधानं गतिजं फलं च ॥३१॥
यातैष्ययोः खण्डकयोर् वियोगं शैघ्राख्ययोः शेषलवादिनिघ्नम् ।
भजेत् खरामैर् ३० अथ वृद्धिहानिक्रमेण लब्ध्या सहितो विहीनः ॥३२॥
यातैष्ययोर् अङ्कयोर् वियोगः शैघ्राख्ययोः केन्द्रजवेन निघ्नः ।
खाष्टेन्दु १८० भक्तो गतिजं फलं स्याच् शैघ्राभिधानं क्षितिजादिकानाम् ॥३३॥

CC-0. Nepal Sanskrit Academy, Kathmandu



मन्दस्फुटा भुक्तिरनेन योज्या हेया च वृद्धिक्षयगक्रमेण ।
स्फुटा गतिः स्याद् अधिके क्षये तु वक्रा गतिः स्याद् विपरीतशुद्धया ।।३४।।
खबाणचन्द्रा १५० भ्यधिकेषु शीघ्रकेन्द्रांशकेषु प्रथमो हरः स्यात् ।
तुल्यः खचन्द्रैर् १० अपरो हरस् तु षष्टया ६० समो भुक्तिफलस्य सिद्धौ ।।३५।।

शीघ्रोच्चगतेर् मन्दस्पष्टगतिं शोधयेच् शेषं शीघ्रकेन्द्रगतिर् भवति । द्वितीयशीघ्रफलसाधने समागतयोर् गतगम्ययोः खण्डयोर् अन्तरं शेषांशादिभिः संगुण्य त्रिंशता ३० भजेत । लब्धं फलम् उपचीयमाने खण्डे गतखण्डे योजयेद्, अपचीयमाने खण्डे तु गतखण्डाद् वियोजयेत् । तत् फलं शीघ्रकेन्द्रगत्या संगुण्य साशीतिशतेन १८० भजेत; आगतं फलं शीघ्रगतिफलं भवति । उपचीयमानेषु शीघ्रफलाङ्केषु तद् गतिफलं मन्दस्पष्टगतौ युञ्जीत, अपचीयमानेषु शीघ्रफलाङ्केषु तु तद् गतिफलं मन्दस्पष्टगतेर् वियुञ्जीत फलं स्पष्टा गतिर् भवति । मन्दस्पष्टगतेः संशोध्यस्य शीघ्रगतिफलस्याऽधिकत्वे शीघ्रगतिफलाद् मन्दस्पष्टां गतिम् एव वियुञ्जीत शेषं वक्रा गतिर् भवति ।

सार्धशताद् १५० अंशेभ्योऽधिकतरेषु शीघ्रकेन्द्रांशेषु पूर्वं त्रिंशत् ३० स्थाने दश १० भाजकः, पश्चात् साशीतिशत १८० स्थाने षष्टिर् ६० भाजको भवतीति न विस्मरणीयम् ।

भौमादिकानाम् उदयेऽस्तमये च शीघ्रकेन्द्रांशान् आह ।

मूलपाठः

भ २७ तान ४९ शक्रो १४ त्कृति २३ मेघ १७ सङ्ख्यैः किलोदयं

प्रतिसंस्कृतपाठः

सप्ताश्विभिर् २७ नवकृतैर् ४९ मनुभिस् १४ त्रिदस्रैः २३
सप्तेन्दुभिः १७ कुजमुखाश् चलकेन्द्रभागैः ।
उद्यन्ति शून्यरिपुवह्नि ३६० लवेभ्य ऊनैस्
तैर् एव यान्ति विलयं चलकेन्द्रभागैः ।।३६।।

| | मङ्गलस्य | बुधस्य | बृहस्पतेः | शुक्रस्य | शनेः |
|---|---|---|---|---|---|
| उदये शीघ्रकेन्द्रांशाः | २७ | ४९ | १४ | २३ | १७ |
| अस्तमये शीघ्रकेन्द्रांशाः | ३३३ | ३११ | ३४६ | ३३७ | ३४३ |

भौमादिकानां वक्रत्वारम्भे वक्रत्वत्यागे च शीघ्रकेन्द्रांशान् आह ।

मूलपाठः

वेदनृपै १६४ र्युगेन्द्रैः १४४ ।
बाणारुणै १२५ र्बाणनृपैः १६५ शरेशै ११५ र्वक्रं कुजाच्छीघ्रलवैः प्रयान्ति ।।१६।।

CC-0. Nepal Sanskrit Academy, Kathmandu



प्रतिसंस्कृतपाठः

अब्धिक्ष्मापैर् १६४ वेदशक्रैः १४४ शराकैर् १२५
बाणक्ष्मापैर् १६५ बाणरुद्रैः ११५ क्रमेण ।
द्राक्केन्द्रांशैर् वक्रगाः स्युः कुजाद्या
एतैश् चक्राच् ३६० शोधितैर् मार्गगाः स्युः ॥३७॥

| | मङ्गलस्य | बुधस्य | बृहस्पतेः | शुक्रस्य | शनेः |
|---|---|---|---|---|---|
| वक्रत्वारम्भे शीघ्रकेन्द्रांशाः | १६४ | १४४ | १२५ | १६५ | ११५ |
| वक्रत्वत्यागे शीघ्रकेन्द्रांशाः | १९६ | २१६ | २३५ | १९५ | २४५ |

वक्रयोर् बुधशुक्रयोर् उदयेऽस्तमये च शीघ्रकेन्द्रांशान् आह ।

मूलपाठः

वक्रज्ञशुक्रौ त्रिनखै २०३ स्त्रिनागचन्द्रै १८३ र्भजेतामुदयं तदंशैः ।
अस्तं च मार्गं च भचक्र ३६० शुद्धैर्

प्रतिसंस्कृतपाठः

वक्रः सौम्यो वह्निशून्यद्वि २०३ तुल्यैर् वक्रः शुक्रो वह्निनागेन्दु १८३ तुल्यैः ।
द्राक्केन्द्रांशैर् दृश्यते प्राग् लवैः स्वैश् चक्राच् शुद्धैर् अस्तमेति प्रतीच्याम् ॥३८॥

| | वक्रगतेर् बुधस्य | वक्रगतेः शुक्रस्य |
|---|---|---|
| पूर्वस्याम् उदये शीघ्रकेन्द्रांशाः | २०३ | १८३ |
| पश्चिमायाम् अस्तमये शीघ्रकेन्द्रांशाः | १५७ | १७७ |

पश्चिमायाम् अस्तमयस्य पूर्वस्याम् उदयस्य तथा पूर्वस्याम् अस्तमयस्य पश्चिमायाम् उदयस्य च व्यवस्थाम् आह ।

मूलपाठः

मन्दा रवेः प्रागुदयं परेऽन्ये ॥१७॥

प्रतिसंस्कृतपाठः

तीक्ष्णांशोः स्पष्टभुक्तेर् भवति लघुतरा स्पष्टभुक्तिर् यदीया
वारुण्याम् अस्तमाप्तो दिवसकतिपयान् स ग्रहः प्राग् उदेति ।
तीक्ष्णांशोः स्पष्टभुक्तेर् भवति पृथुतरा स्पष्टभुक्तिर् यदीया
लुप्तः शातक्रतव्यां दिवसकतिपयान् दृश्यते स प्रतीच्याम् ॥३९॥

CC-0. Nepal Sanskrit Academy, Kathmandu



यस्य ग्रहस्य स्पष्टा दैनिकी गतिः सूर्यस्य स्पष्टाया दैनिक्या गतेर् अल्पीयसी भवति स ग्रहः पश्चिमायां दिश्यस्तं गच्छति । ततः कतिचन दिनानि न दृश्यमानः स ग्रहः पूर्वस्यां दिश्युदेति । यस्य ग्रहस्य स्पष्टा दैनिकी गतिः सूर्यस्य स्पष्टाया दैनिक्या गतेर् महीयसी भवति स ग्रहः पूर्वस्यां दिश्यस्तं गच्छति । ततः कतिचन दिनानि न दृश्यमानः स ग्रहः पश्चिमायां दिश्युदेति ।

वक्रत्वोदयास्तमयसमयसाधनम् आह ।

इष्टे काले शीघ्रकेन्द्रोद्भवेभ्यो वक्रत्वादेर् बोधकेभ्यो लवेभ्यः ।
अल्पीयांसो वा ऽधिका अन्तिकस्थाश् चेत् स्युः स्वीयाः शीघ्रकेन्द्रोत्थभागाः ।।४०।।
लब्धो घस्रः शीघ्रकेन्द्रस्य गत्या चेत् स्यात् किं स्याद् अन्तरेणाऽमुनेति ।
लब्धैर् घस्रैर् वक्रतादिः खगस्य पश्चात् प्राग् वा स्वेष्टकालात् प्रसिध्येत् ।।४१।।

मेषसङ्क्रान्तिकाले साधिताः स्पष्टा ग्रहाः पञ्चाङ्गपत्रे लिख्यन्ते । ततः सप्तानां सप्तानां वाराणाम् अन्तरेण ग्रहाः प्रसाध्य पञ्चाङ्गपत्रे लिख्यन्ते । एतावत्स्वेतावत्सु शीघ्रकेन्द्रांशेषु ग्रहस्याऽस्तमय उदयो वक्रत्वं वक्रत्वत्यागो भवतीति ग्रन्थे लिखितं भवति । ग्रन्थे लिखितानां शीघ्रकेन्द्रांशानाम् आसन्नतमाञ् शीघ्रकेन्द्रांशान् ग्रहगणनादर्शिनि पत्रेऽन्विष्य तेषां शीघ्रकेन्द्रांशानां ग्रन्थे निर्दिष्टानां शीघ्रकेन्द्रांशानां चाऽन्तरं साधनीयम् । शीघ्रकेन्द्रगत्या दिनम् एकं लभ्येत चेद् अमुना शेषेण (अन्तरेण) किमित्यनुपातेन दिनादिकम् आनेयम् । यस्मिन् काले साधिताः स्पष्टा ग्रहाः पञ्चाङ्गपत्रे लिख्यन्ते स कालोऽवधिकाल इत्युच्यते । ग्रन्थे पठितेभ्योऽस्तमयादिबोधकेभ्यः शीघ्रकेन्द्रांशेभ्योऽवधिकालस्थाः शीघ्रकेन्द्रांशा अल्पीयांसश् चेद् भवेयुः, तद् आगतं दिनादिकफलम् अवधिकाले योजनीयम् अभीष्टोऽस्तमयादिसमयो भवति । ग्रन्थे निर्दिष्टेभ्योऽस्तमयादिबोधकेभ्यः शीघ्रकेन्द्रांशेभ्योऽवधिकालस्थाः शीघ्रकेन्द्रांशा अधिकतराश् चेद् भवेयुस् तद् आगतं दिनादिकं फलम् अवधिकालाच् शोधनीयम् अभीष्टोऽस्तमयादिसमयो भवति ।

उदयादिषु दिनज्ञानम् आह ।

मूलपाठः

खांशैः ३०० शरागै ७५ स्त्रिशतै ३०० र्नखेन्दुभि १२०
भौमस्य दन्तै ३२ स्त्रियमै २३ रदै ३२ रदैः ३२ ।
बुधस्य जीवस्य तु वारणारुणैः १२८
खार्कै १२० र्गजाक्षीन्दुभि १२८ रम्बराग्निभिः ३० ।।१८।।
शुक्रस्य बाणाग्नियमै २३५ द्विबाणैः ५२ पञ्चाग्निपक्षै २३५ र्वसुसप्तभि ७८ श्च ।
शने रसाभ्रेन्दुभि १०६ रक्षविश्वै १३५ र्बाणाभ्रचन्द्रै १०५ र्गजराम ३८ घस्रैः ।।१९।।
उदयात् कुटिलस्ततोऽथ मार्गस्तस्मादस्तमतः प्रकाशता ।
कुसुतादिषु संभवन्ति घस्रैरिति सच्छात्रसुखाय दर्शितोऽत्र ।।२०।।

CC-0. Nepal Sanskrit Academy, Kathmandu



एवं साधारणमुक्त्वा बुधशुक्रयोर्विशेषम् आह ।

युगै ४ र्जिनै २४ र्वक्रगयोरदृश्यता ततो नृपै १६ र्नाग ८ दिनैर्ज्ञशुक्रयोः ।
दृश्यत्वमस्माद् ऋजुता युगै ४ र्दिनैः सिद्धै २४ र्भवेतामनुमानमेतत् ॥२१॥

प्रतिसंस्कृतपाठः

मङ्गलस्योदयादिचक्रपूर्तिदिवसान् आह ।

पूर्वस्याम् उदितो महीतनुभवो घस्रैस् त्रिशत्या ३०० मितैर्
वक्रत्वं समुपैति बाणगिरिभिर् ७५ घस्रैर् दधात्यार्जवम् ।
वारुण्यां विलयं प्रयाति दिवसैः शून्याभ्ररामो ३०० न्मितैः
पूर्वस्यां समुदेति शून्यरविभिर् १२० घस्रैः पुनः पूर्ववत् ॥४२॥

मङ्गलस्य

| | दिवसैः | |
|---|---|---|
| पूर्वोदयात् | ३०० | वक्रत्वम् |
| वक्रत्वात् | ७५ | वक्रत्वत्यागः |
| वक्रत्वत्यागात् | ३०० | पश्चिमास्तमयः |
| पश्चिमास्तमयात् | १२० | पूर्वोदयः |

बुधस्योदयादिचक्रपूर्तिदिवसान् आह ।

वारुण्याम् उदितः शशाङ्कतनयो घस्रैर् द्विरामो ३२ न्मितैर्
वक्रत्वं समुपैति तत्र विलयं वेदैर् ४ दिनैर् गच्छति ।
पूर्वस्याम् उदयं प्रयाति दिवसैः षड्भूमिभिः १६ संमितैर्
घस्रैः सागर ४ संमितैर् अनृजुताभाजं गतिं मुञ्चति ॥४३॥
पूर्वस्यां विलयं प्रयाति दिवसैर् नेत्राग्निभिः ३२ संमितैर्
वारुण्यां समुदेति नेत्रदहनैर् ३२ घस्रैस् ततः पूर्ववत् ।

बुधस्य

| | दिवसैः | |
|---|---|---|
| पश्चिमोदयात् | ३२ | वक्रत्वम् |
| वक्रत्वात् | ४ | पश्चिमास्तमयः |
| पश्चिमास्तमयात् | १६ | पूर्वोदयः |
| पूर्वोदयात् | ४ | वक्रत्वत्यागः |
| वक्रत्वत्यागात् | ३२ | पूर्वास्तमयः |
| पूर्वास्तमयात् | ३२ | पश्चिमोदयः |

CC-0. Nepal Sanskrit Academy, Kathmandu



बृहस्पतेर् उदयादिचक्रपूर्तिदिवसान् आह ।

पूर्वस्याम् उदितो गुरुर् गजभुजक्ष्माभिर् १२८ मितैर् वासरैर्
वक्रत्वं समुपैति शून्यरविभिर् १२० घस्रैर् दधात्यार्जवम् ।।४४।।
वारुण्यां विलयं प्रयाति दिवसैर् नागाक्षिभू १२८ संमितैः
पूर्वस्यां समुदेति शून्यशिखिभिर् ३० घस्रैः पुनः पूर्ववत् ।

बृहस्पतेः

| | दिवसैः | |
|---|---|---|
| पूर्वोदयात् | १२८ | वक्रत्वम् |
| वक्रत्वात् | १२० | वक्रत्वत्यागः |
| वक्रत्वत्यागात् | १२८ | पश्चिमास्तमयः |
| पश्चिमास्तमयात् | ३० | पूर्वोदयः |

शुक्रस्योदयादिचक्रपूर्तिदिवसान् आह ।

वारुण्यां भृगुनन्दनः समुदितो घस्रैः शराग्निद्विभिर् २३५
वक्रत्वं समुपैति तत्र विलयं प्राप्नोति सिद्धैर् २४ दिनैः ।।४५।।
पूर्वस्याम् उदयं प्रयाति दिवसैः स्तम्बेरमैः ८ संमितैर्
घस्रैर् वेदभुजा २४ मितैर् अनृजुताभाजं गतिं मुञ्चति ।
पूर्वस्यां विलयं प्रयाति दिवसैः पञ्चाग्निबाहून्मितैर् २३५
वारुण्यां समुदेति नागगिरिभिर् ७८ घस्रैः पुनः पूर्ववत् ।।४६।।

शुक्रस्य

| | दिवसैः | |
|---|---|---|
| पश्चिमोदयात् | २३५ | वक्रत्वम् |
| वक्रत्वात् | २४ | पश्चिमास्तमयः |
| पश्चिमास्तमयात् | ८ | पूर्वोदयः |
| पूर्वोदयात् | २४ | वक्रत्वत्यागः |
| वक्रत्वत्यागात् | २३५ | पूर्वास्तमयः |
| पूर्वास्तमयात् | ७८ | पश्चिमोदयः |

CC-0. Nepal Sanskrit Academy, Kathmandu



शनेर् उदयादिचक्रपूर्तिदिवसान् आह ।

पूर्वस्याम् उदितो दिवाकरसुतः कोषाभ्रचन्द्रैर् १०६ दिनैर्
वक्रत्वं समुपैति बाणगुणभू १३५ घस्रैर् दधात्यार्जवम् ।
वारुण्यां विलयं प्रयाति दिवसैर् बाणाभ्रचन्द्रो १०५ न्मितैः
पूर्वस्यां समुदेति वारणगुणैर् ३८ घस्रैस् ततः पूर्ववत् ॥४७॥

शनैश्चरस्य

दिवसैः

| | | |
|---|---|---|
| पूर्वोदयात् | १०६ | वक्रत्वम् |
| वक्रत्वात् | १३५ | वक्रत्वत्यागः |
| वक्रत्वत्यागात् | १०५ | पश्चिमास्तमयः |
| पश्चिमास्तमयात् | ३८ | पूर्वोदयः |

अत्रोक्ता उदयादिचक्रपूर्तिदिवसाः स्थूला इत्याह ।

ताराग्रहाणाम् उदयादिकानां घस्रा इमे स्थूलतया निरुक्ताः ।
सामान्यबोधस् तु भवेद् अनेन सूक्ष्मत्वहेतोर् गणना विधेया ॥४८॥

अगस्त्यास्तमयोदयकालिकयोः सूर्ययोः साधनम् आह ।

मूलपाठः

पलप्रभा स्वार्द्धयुतेषु (७।३०) निघ्नी तद्युक् खनन्द ९० प्रमसूर्यभागैः ।
किलोदयं तद्रहिताष्टतर्क ६८ प्रमार्कभागैर्घटजोऽस्तमेति ॥२२॥

प्रतिसंस्कृतपाठः

सार्द्धैः सप्तभि (७।३०) राहता पलभवच्छाया विधेया लवैस्
तद्घातप्रभवैर् गजाहित ६८ मिता अंशा वियोज्यास् तथा ।
संयोज्या गगनाङ्क ९० संमितलवास् तावद्भिरंशैर् मिते
स्पष्टे भास्वति कुम्भसम्भवमुनेर् अस्तोदयौ स्तः क्रमात् ॥४९॥

स्वदेशजाम् अङ्गुलात्मिकां पलभां सार्द्धसप्तभिर् (७।३०) गुणयित्वा ऽ। शादिकं फलम् आनयेत् । तद् अंशादिकं फलम् अष्टषष्टेर् ६८ अंशेभ्यः शोधयेत् । शेषमितम् अंशादिकं फलम् अगस्त्यास्तसूर्यो भवति । तद् एवांऽशादिकं फलं नवता ९० वंशेषु योजयेत् । योगमितम् अंशादिकं फलम् अगस्त्यस्योदयसूर्यो भवति । अस्तसूर्यमिते स्पष्टसूर्ये स्वदेशेऽगस्त्योऽस्तम् एति, उदयसूर्यमिते स्पष्टसूर्ये स्वदेशेऽगस्त्य उदयम् एति ।

CC-0. Nepal Sanskrit Academy, Kathmandu



अगस्त्यस्याऽस्तमयकालिकः स्पष्टसूर्यः = ६८ अंशाः - { (७।३०) स्वदेशजा पलमा } (अंशादिः)
अगस्त्यस्योदयकालिकः स्पष्टसूर्यः = ९० अंशाः + { (७।३०) स्वदेशजा पलमा } (अंशादिः)

राहुसाधनम् आह ।

मूलपाठः

दिननवकु १९ लवैर्दिनस्य बाणश्रुति ४५ फलसम्मितदण्डकैर्विहीनः ।
ध्रुवक इह भवेद् विलोमगत्या प्रतिदिनमेव शशाङ्कपातखेटः ॥२३॥

प्रतिसंस्कृतपाठः

नवधरणि १९ विभक्तो घस्रसङ्घो लवादिः शरजलधि ४५ विभक्तो घस्रसङ्घः कलादिः ।
अपनय फलयोगं सैंहिकेयध्रुवात् स्यात् शिशिरकिरणपातो वासरेऽर्कोदये स्वे ॥५०॥

अहर्गणोत्पन्नो राहुः = $\left(\frac{\text{अ}}{\text{१९}}\right)$ अंशादिः + $\left(\frac{\text{अ}}{\text{४५}}\right)$ कलादिः [३]

राहुः = राहुध्रुवः - अहर्गणोत्पन्नो राहुः

ग्रहाणां नक्षत्रचरणप्रवेशकालसाधनम् आह ।

मूलपाठः

भचरणाधिकहीनखगः कलीकृत इतिप्रहृतस्तदयुग्युतः ।
अवधिकाल उडुप्रगतो भवेद् ऋजुगतावनृजौ तु विपर्ययः ॥२४॥

प्रतिसंस्कृतपाठः

नक्षत्रपादस्य खचारिणश् च यद् अन्तरं स्यात् कलिकादिरूपम् ।
गत्या भजेत् तस्य खगस्य सिध्येद् दिनादिकं चालननामधारि ॥५१॥
ग्रहेऽधिके तेन फलेन हीनं ग्रहेऽल्पके तेन फलेन युक्तम् ।
पूर्वप्रसिद्धावधिसंज्ञकालं कुर्यात् प्रसिद्ध्येत् खचरस्य तस्य ॥५२॥
अभीष्टनक्षत्रभवेष्टपादप्रवेशकालो, यदि खेट एषः ।
वक्रां गतिं चेद् विदधीत तत्र स्याद् वैपरीत्यं वियुतौ युतौ च ॥५३॥

---

३. अहर्गणाद् राहोः साधनस्येयम् एव रीतिर् गणेशदैवज्ञेन कथिता । तथाहि

नवकुभि १९ रिषुवेदै ४५ र्घस्रसङ्घाद् द्विधा ऽऽप्तात् ।
फललवकलिकैक्यं स्यादगुश्चक्र ३६० शुद्धः ॥११॥

(ग्रहलाघवे मध्यमाधिकारे)

CC-0. Nepal Sanskrit Academy, Kathmandu



यस्याऽभीष्टस्पष्टग्रहस्य नक्षत्रचरणप्रवेशकालोऽपेक्षितः तस्याऽन्यतमस्य नक्षत्रचरणस्य राश्यंशकलाविकला विलिख्य तेषाम् अभीष्टस्पष्टग्रहस्य राश्यंशकलाविकलानां चाऽन्तरम् आनयेत् । तद् अन्तरं कलादिकं कृत्वा तत् कलादि तस्य ग्रहस्य कलादिकया स्पष्टगत्या विभज्य दिनादिकं फलम् आनयेत् । तद् दिनादिकं फलं चालनफलम् इत्यभिधीयते । नक्षत्रचरणस्य राश्यादिभ्योऽभीष्टस्पष्टग्रहस्य राश्यादयोऽधिकतराश् चेत् तच् चालनफलम् ऋणात्मकं भवति । नक्षत्रचरणस्य राश्यादिभ्योऽभीष्टस्पष्टग्रहस्य राश्यादयो न्यूनतराश् चेत् तच् चालनफलं धनात्मकं भवति । यस्मिन् काले ग्रहः साधितः स कालोऽवधिकाल इत्युच्यते । अवधिकाले धनात्मकं चालनफलं युञ्जीत, ऋणात्मकं चालनफलं त्ववधिकालाच् शोधयेत्, नक्षत्रचरणप्रवेशकाल आगच्छति । वक्रगतौ ग्रहे तु धनात्मकं चालन-फलम् अवधिकालाच् शोधनीयम् ऋणात्मकं चालनफलम् अवधिकाले योजनीयम् ।

अस्याऽधिकारस्योपसंहारम् आह ।

दैवज्ञलक्ष्मीपतिना कृतस्य सिद्धान्तसारस्य लघुक्रियस्य ।
ताराग्रहाणां गणनाधिकारः सुबोधहेतोः प्रतिसंस्कृतोऽभूत् ।।५४।।

इति दैवज्ञशिरोमणिना लक्ष्मीपतिशर्मणा विरचितस्य सिद्धान्तसारस्य रत्नदीपस्य प्रतिसंस्कृते रूपे भौमादितारग्रहाणां स्पष्टाधिकारः



रत्नदीपस्य मूलभागः २०३५ वैक्रमाब्दे काष्ठमण्डपस्थेन संशोधनमण्डलेन प्रकाशितस्य नयराजपन्तस्य (सहायकस्य रामजीतेवारिणः) पाँडेकुलोत्पन्नेन दैवज्ञशिरोमणिना लक्ष्मीपतिशर्मणा विरचितस्य रत्नदीपस्य मूलभाग इति ग्रन्थे प्रकाशितो वर्तते । प्रतिसंस्कृतस्य रत्नदीपस्य ग्रहध्रुवाधिकारपञ्चाङ्गाधिकारौ २०४७ वैक्रमाब्दे काष्ठमण्डपस्थेन नेपालराजकीयप्रज्ञाप्रतिष्ठानेन प्रकाशितस्य नयराजपन्तस्य (सहायकानां तेवार्युपनामकरामजी-भण्डार्युपनामकदेवीप्रसाद-पौडेलोपनामकरुक्मनाथानाम्) रत्नदीप (पहिलो भाग) इति ग्रन्थस्य ४५१-४९५ पृष्ठेषु प्रकाशितौ वर्तेते ।

प्रतिसंस्कृतस्य रत्नदीपस्याऽवशिष्टो भागः पूर्णिमायाः ९२ अङ्के प्रकाशयिष्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu

CC-0. Nepal Sanskrit Academy, Kathmandu

पूर्णिमा (इतिहास-प्रधान त्रैमासिक पत्रिका) का. मे. अ. द. नं. १५५/२४६

कार्यालय

**संशोधन-मण्डल**

वटु सवलबहाल

प-१-५३० काठमाडौं- ३

नेपाल

फोन नं. २-४९६९२

**वि. सं. २०५३ चैत्र**

यस अङ्कको मूल्य रु. ५५।-

मुद्रक

**पुष्प प्रेस**

नयां बानेश्वर

ख - १ - ३७३ काठमाडौं- १

नेपाल

फोन नं. ४-७३५८१